श्रीहरिर्जयति ।

विद्वन्मण्डनोपोद्घातः ।

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ॥

श्रीहरिर्ज्जयति ।

विद्वज्जनावर्ज्जनं नाम ।

विद्वन्मण्डनोपोद्घातः ।

सन्मार्गसंरक्षणापरपर्य्यायः ।

श्रीमदाचार्य्यचरणानुचरेण

भट्टश्रीबलभद्रशर्म्मणा

कविकाव्यरत्नाकरकविचूडामणिशुद्धाद्वैतभूषणकविरत्न-
महामहोपदेशकविद्यालङ्कारवेदान्तविद्यानिधिना

विनिर्म्मितः ।

श्रीमधुपुर्य्यां

श्रीमद्वल्लभाधीशविद्यामन्दिरात्

प्रकाशितः ।

१९८५ ।

निर्मञ्छनमेकं रूप्यम् ।

प्रकाशकः—
पण्डितभट्टश्रीबलभद्रशर्म्मा,
श्रीमद्वल्लभाधीशविद्यामन्दिर,
विश्रामघाट,
मथुरा. यू. पी.

मुद्रकः—
वि. बा. परांजपे,
नेटिव ओपिनियन प्रेस,
आंग्रेवाडी, गिरगांव, मुंबई.

श्रीहरिः ।

विज्ञप्तिः ।

सन्मार्गसंरक्षणसक्षणेषु विचक्षणेष्वप्रतिमेक्षणेषु ।
श्रीमन्निजाचार्य्यमुखारविन्दसुधावधानप्रतिभानवत्सु ॥ १ ॥

तदभ्युपायञ्च यथार्थरीत्या विबुध्य तच्छीलनतत्परेषु ।
आदौ ततस्तु स्वमतस्वरूपयाथात्म्यविज्ञानविधीनुशत्सु ॥ २ ॥

श्रीवल्लभाधीश्वरविठ्ठलेशवंशावतारोद्धृतभूतलेषु ।
गोस्वामिवर्य्येषु समस्तविद्वन्महीपवन्द्याङ्घ्रिसरोरुहेषु ॥ ३ ॥

सभक्ति सस्नेहमभिप्रणम्य विज्ञापये साञ्जलिरार्द्रचित्तः ।
श्रीमत्कृपाविस्फुरितामृतोऽयं समृध्यतां स्वृद्धिशतैः प्रबन्धः ॥ ४ ॥

श्रीमत्प्रभुचरणैः

साक्षात् सर्वात्मनाऽऽत्मसात्कृतकुल-

स्तच्चरणरजोधनानुचरो

भट्टश्रीबलभद्रशर्म्मा ।

प्रबन्धेऽस्मिन् ।

विशेषतो द्रष्टव्यम् ।

प्रवाहमर्य्यादा, प्रमेयमर्य्यादा, तत्रैका धर्मद्वारा धर्मिपरा अन्या साक्षाद्धर्मिपरेति तद्भेदौ, सर्वशीर्षण्या पुष्टिपुष्टिस्तदभिसम्बन्धश्चेति । एवमन्यदपि । शुभम् ।

श्रीहरिर्ज्जयति ।

अत्रैतत्सिद्धम् ।

मुख्यभक्तिमार्गे तथा तथा निरूपितोपयोगो ब्रह्मवादः शुद्धपुष्टितत्फलप्रापिका साक्षाद्धर्मिपरा साक्षान्मुख्यपुष्टिमार्गरूपा स्वमार्गीया स्वेतरसर्वविलक्षणा मर्यादा तथैव तत्फलरूपा पुष्टिपुष्टिश्चेति त्रितयमखण्ड एकः पुष्टिमार्गः । न त्वत्र वस्त्वन्तरमस्ति । नाप्यत्र तारतम्यमपि सगुणनिर्गुणत्वादिरूपं वा साधनसाध्यत्वतदसाध्यत्वरूपं वा प्रमाणोपपन्नत्वतदभावरूपं वा प्राप्नोति । किन्तु तादृशातिशयितानुग्रहैकसाध्यफलोपलब्धिहेतवे ब्रह्मवादसाक्षाद्धर्मिपरमर्यादयोः साक्षात्तादृशानुग्रहैकाधीनस्थितिकतयैव तादृशेऽधिकारिविशेषे प्रमाणैः समुदयनिर्णयात्तत्त्रितयमेकरूपमेव । एकत्वत एवैवंविधात्—"साकारब्रह्मवादैकस्थापक" इत्यत्रैकपदस्य तदितरव्यावर्त्तनपरत्वेन साकारब्रह्मवादपदत एव फलात्मकपुष्टिमार्गमपि सङ्गृह्याऽभिदधुः श्रीमत्प्रभुचरणाः । एवञ्च साकारब्रह्मवादः पुष्टिमार्गश्चेति पर्य्यायाभ्यां पदाभ्यामेकस्यैव वस्तुनो व्यपदेशः । न वस्त्वन्तराभिलापः । साक्षाद्धर्मिपरा च मर्य्यादा साक्षान्मुख्यपुष्टिमार्गरूपेति साकारब्रह्मवादपदेनैव तदभिधानमपि । साकारब्रह्मवादश्चैवंविधो नाऽन्यरूप इति सोऽपि साक्षान्मुख्यपुष्टिमार्गरूप एव । ततश्च तथा तथा विशकलनेन तदुपपादनं साधनफलरूपत्वादिविशेषावबोधद्वारा बालव्युत्पादनैकप्रयोजनम् । न त्वेतावता ब्रह्मवादसाक्षाद्धर्मिपरमर्य्यादयोर्भिन्नार्थत्वमास्थाय पुष्टिपुष्टेः प्राप्त्यभिलाषसम्भ्रमरभसेन तत्परित्यागः श्रीमदाचार्य्यचरणसिद्धान्तबहिर्भूतः सर्वथैव फलोपघातकः स्वप्नेऽपि कर्त्तव्यतयाऽनुसन्धेयः । एवमेव हि श्रीमदाचार्य्यचरणसिद्धान्ते "मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवे" ति न्यायेन सकलशास्त्रसमन्वयः सिद्ध्यति । तेनैव तन्मतस्य प्रामाणिकत्वापाषण्डत्वादिसिद्ध्या सकलस्य श्रेयोऽर्थिनो जनस्य तत्राऽऽदरः सिद्ध्यति । तथाच निरस्तसमस्तसंशयप्रसरसम्भवं निर्णुन्ननिखिलावद्यं सकलकल्याणगुणगणोत्तरं ब्रह्मेशानादिभिरप्याशास्यप्रवेशो-

त्सवं सर्वनिर्मत्सरविद्वद्वर्गरसनीयरससन्दोहैकरससर्वस्वं समस्तसन्मतमौलिलालितप्रशास्तिशासनञ्च सूर्यसहस्रनिर्मञ्छनीयविद्योतमभिविद्योततेतमां श्रीमदाचार्यचरणसम्मतं मतं दिगन्तरेष्विति तदनुसरणमेवाऽऽवश्यकं विदुषाम्। भूषणं चाऽपि तेषां तदेव। तत एव हि जगतां मङ्गलमिति। अन्यथा तु—"अयमेव महामोहो ह्रीदमेव प्रतारणम्। यत्कृष्णं न भजेत् प्राज्ञः शास्त्राभ्यासपरः कृती" ति श्रीमदाचार्य्यचरणवचनेन तद्वैदुष्यवैयर्थ्यजनितो दुष्प्रसह एव तेषां तदनुगानाञ्च खेदः। तस्मादसम्भावनाविपरीतभावनाद्युत्साद्य पाषण्डिनामसद्वादाननुसन्धाय तादृशपुष्टिपथप्रणयोदयकृतार्थितजीवनैरेव भवितव्यं विद्वज्जनैः। भ्रान्तैश्च भ्रमाद्युज्झित्वा श्रीमदाचार्य्यचरणैकशरणैस्तदुपदेशैकपीयूषपायिभिः स्वपथादप्रमाद्यद्भिर्वर्त्तितव्यम्। न तु त्यागाद्युत्पथप्रवृत्त्या मार्गप्रमोषोऽनकारपराहतैरुपस्थाप्य इति।

विद्वन्मण्डनोपोद्घाते ६८ पृष्ठे ग्रन्थः।

संक्षिप्तो

विषयानुक्रमः ।

***

भवतः श्रीमदाचार्य्या भवदीयोऽहमाश्रये ।
मदीयोऽयं मदीयोऽयं विचारयत मामिति ॥

***

श्रीहरिर्ज्जयति ।

विद्वज्जनावर्जनं नाम

विद्वन्मण्डनोपोद्घातः ।

सन्मार्गसंरक्षणापरपर्य्यायः ।

(अत्यावश्यकविषयविशेषनिवेशविभूषितः)

विद्वद्भिः सर्वथा श्राव्यं ते हि सन्मार्गरक्षकाः ।

पत्रावलम्बनग्रन्थे श्रीमद्वल्लभाचार्य्यचरणाः ।

श्रीगोकुलेन्दोर्वपुषश्छटासु लीलारसोल्लासमदोत्कटासु ।
नवाम्बुदानीकघटोद्भटासु मनः प्रसक्तं न विभिद्यतां नः ॥ १ ॥
अकल्पकल्पद्रुममल्पकल्पनाविकल्पजल्पप्रतिकल्पकौतुकम् ।
अनल्पकल्पक्लमसम्प्लवप्लवं महाप्रभूणां चरणाम्बुजं वृणे ॥ २ ॥

अलमतिप्रसङ्गेन । सम्प्रति तावच्चतुर्थपञ्चमपीठाधीश्वरैर्विख्यातकीर्त्तीनां श्रीदेवकीनन्दनाचार्य्याणां सूनुरत्नैः श्रीवल्लभाचार्य्यगोस्वामिवर्य्यैः श्रीमत्प्रभुचरणप्रणीतं विद्वन्मण्डनं प्रकाश्यते । तस्य च सरससुभगगम्भीरपदवाक्यविस्तराविवृतप्रतिपाद्यवैभवस्य स्वस्वरूपमहिम्ना विद्वज्जनमनोरमाभिः सुवर्णसूत्रादिभिर्महामहापण्डितप्रणीताभिर्व्याख्याभिराख्यातगुणगणार्णवस्य विश्रुतवैदुष्यविशेषयशःप्रकाशितदिङ्मुखैः श्रीमद्वामनाचार्य्यदेशिकैः पर्य्यवेक्षितसंशोधनकृत्यस्य तच्छिष्येण पण्डितप्रवरेण श्रीमता जगन्नाथशर्म्ममहोदयेन टिप्पण्या च संस्कृत-

हिन्दीनिष्कर्षद्वयेन चोपढौकितस्य प्रस्तावनयाऽपि च तत्प्रणीतया धृतप्रणिधानस्य सुगमं स्वरूपमिति "नदीमुखेनेव समुद्रमाविशदि" ति न्यायेन ग्रन्थगहनप्रवेशहेतुतया तत्स्वरूपादिविवेचनपरया नास्ति विशेषतोऽर्थः प्रसक्तपौनरुक्त्यया प्रस्तावनयेति ।

तथापि—"कलिकालतमश्छन्नदृष्टित्वाद्विदुषामपि । सम्प्रत्यविषयस्तस्य माहात्म्यं समभूद्भुवी" ति वचनेन तेषां तेषां विदुषामपि भगवन्माहात्म्याज्ञानान्यथाज्ञानाभ्यामसम्भावनाविपरीतभावनाभ्याञ्च वैमुख्यदार्ढ्येन [1]परितस्तमःप्रसर्पणं मा स्म भूदवारितमेव—येनेदानीन्तनानां साकारब्रह्मवादैकस्थापकेषु वेदपारगेषु मायावादनिराकर्त्तृषु सर्ववादिनिरासकृत्सु भक्तिमार्गाब्जमार्त्तण्डेषु श्रीभागवतपीयूषसमुद्रमथनक्षमेषु तत्सारभूतरासस्त्रीभावपूरितविग्रहेषु रासलीलैकतात्पर्य्येषु प्रतिक्षणनिकुञ्जस्थलीलारससुपूरितेषु सान्निध्यमात्रदत्तश्रीकृष्णप्रेमसु विश्वोद्धारार्थमेवाऽऽविर्भूतवृन्दावनप्रियेषु भगवद्वाक्पतिषु श्रीमद्वल्लभाचार्य्यचरणेषु—श्रिया कीर्त्त्या कान्त्या वैदुष्यमहिम्ना स्वरूपेण च तत्तुल्ययशस्तौर्य्यत्रिकेषु श्रीमत्प्रभुचरणपदाभिष्टूयमानपरमानुभावेषु तत्पुत्ररत्नेषु श्रीविट्ठलेश्वरचरणेषु च दोषबुद्ध्या ग्रन्थाभिरुचिरेव प्रणष्टेति "मूलं नास्ति कुतः शाखा" इति न्यायेन तदनुशीलनादौ[2] सुदूरोदस्ते तदनुपयोगसन्मार्गालाभौ ताभ्याञ्च—"आसुरीं योनिमापन्ना मूढा[3] जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिमि" त्यासुरसर्गप्रवेशाधमगती अनिवार्य्ये एव

---

१ तत्पुत्रपौत्रतच्छिष्यप्रशिष्यतत्सम्बन्धिषु । २ आदिपदेन तज्ज्ञेभ्यस्तच्छ्रवणादि तमोभङ्गो वस्तुप्रकाशस्तदनुसृत्य वर्त्तनादि च । ३ मूढा इति विशेषणेन सन्मार्गालाभ एव तेषां प्रतिजन्माऽऽसुरयोनिलाभेऽधमगतौ च निमित्तमिति ।स्थितमेतत्कृष्णसेवा सदा कार्य्येत्यत्र श्रीमत्पुरुषोत्तमीये सिद्धान्तमुक्तावलीविवृतिप्रकाशे ।

प्रसज्ज्येयाताम्प्रसक्तश्च सन्मार्गोच्छेदोऽपीति सर्वातिप्रसङ्गपरिहाराय श्रीमद्वल्लभाधीशचरणश्रीमद्विठ्ठलेश्वरचरणानां तदुक्तीनां तत्सिद्धान्तसहस्रदीधितेश्च स्वरूपवस्तुयाथात्म्यदिङ्गनिदर्शनेन प्रोत्साहनद्वारा विदुषामावर्ज्जनं सुतरामावश्यकम् ।

तथाहि—विद्वन्मण्डनमिति नामैव हि विदुषां प्रोत्साहनमिति तदावर्ज्जनावश्यकता तज्ज्ञानां श्रीमत्प्रभुचरणोपदिष्टैवेति नास्त्यत्र सन्देहः । मण्डनपदेनैतद्ग्रन्थार्थधारणावधीरणायां वैदुष्यस्य पृथुशास्त्रकथाकन्थारोमन्थतायामेव पर्य्यवसानं दारिद्र्यदौर्गत्यदुर्भगत्वदौर्भाग्यादिरूपत्वञ्च संसूचितमेव संक्षिप्तवचनैः श्रीमत्प्रभुचरणैरित्यातिरोहितमेवेति ।

एवमत्याग्रहेण विदुषामेतद्ग्रन्थार्थानुशीलनावश्यकत्वकथने बीजन्तु पत्रावलम्बनग्रन्थे—"डिण्डिस्तु वादितो द्वारि विश्वेशस्य मयाऽत्र हि । विद्वद्भिः सर्वथा श्राव्यं ते हि सन्मार्गरक्षका" इत्यत्र "ते हि सन्मार्गरक्षका" इति श्रवणे श्रीमदाचार्य्यचरणैर्हेतुनिर्द्देश एव। विद्वद्भिः सन्मार्गारक्षणे—"नीरक्षीरविवेके हंसाऽऽलस्यं त्वमेव तनुषे चेत् । विश्वस्मिन्नधुनाऽन्यः कुलव्रतं पालयिष्याति कः" "उत्सीदेयुरिमे लोका न कुर्य्यां कर्म चेदहम् । सङ्करस्य च कर्त्ता स्यामुपहन्यामिमाः प्रजाः" "योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किन्तेन न कृतं पापं चौरेणाऽऽत्मापहारिणे" त्यादिभिस्तेषां दोषः प्रसज्ज्येत।

तस्मात्तत्तन्मताग्रहं परित्यज्याऽपि श्रीमदाचार्य्यचरणमतमेव विद्वद्भिरनुसर्त्तव्यम् । मण्डनत्वात् । तदनुसरणाभावे तु वस्तुतो वैदुष्येऽपि संशयः । "बुद्धेः फलमनाग्रह" इति वचनात् ।

आग्रहे विदुषां कारणं नास्तीत्यणुभाष्यान्तिमपद्येषूक्तं श्रीमदाचार्य्यचरणैः । तथाहि—"नानामतध्वान्तविनाशन-

क्षमो वेदान्तहृत्पद्मविकासने पटुः । आविष्कृतोऽयं भुवि भाष्यभास्करो बुधा मुधा धावत नाऽन्यवर्त्मसु" इति । भास्करे ह्युदिते उन्मार्गप्रवेशो मनोविक्षेपहेतुक एवेति तदनाग्रहेण सन्मार्गप्रवेश एव वैदुष्यसाफल्यजनकः । तमोविलये प्रकाशे च भ्रमादिसम्भावनाभावेन प्रमाणानुग्राहकान्तरानपेक्षणात् । बुधा इति बुद्धिमत्त्वरूपा स्वरूपयोग्यता तदनुग्राहकश्च भाष्यभास्कर इत्यालोकसंयोगानुगृहीतं चक्षुरिन्द्रियमिव यथार्थबोधोदयमवश्यमेव विदध्यादिति । तत एव मुधेति पदम् । तत एव च पत्रावलम्बनग्रन्थे "सर्वथा श्राव्यामि" ति सर्वथापदम् । "आविष्कृतोऽयं भुवी" ति पदत्रयेण कालप्रतीक्षाप्राप्तो विलम्बो वा, भाष्यस्य भास्करत्वोक्तिरादित्यो यूप इत्याद्यर्थवादवत्प्रौढिमात्रं वा वास्तव्येव वेति संशयो वा, लोकान्तरस्थतया स्वानुपयोगित्वेन नाप्राप्तोऽन्यथानिर्वाहो वा, न कर्त्तव्यः, किन्तर्हि, आविष्कृत इत्युक्त्या अविलम्बेन, अयमित्युक्त्या प्रत्यक्षत्वात्संशयानवसर इति संशयविशसनेन, भुवीत्युक्त्याऽन्यथा निर्वाहमकृत्वा च, भाष्यभास्करसम्बन्धेनाऽबोधध्वान्तनिवृत्त्या वेदान्तहृत्पद्मविकासे च भक्तिमकरन्दास्वादः सर्वथाऽप्यपरिहरणीय एवेति ।

अन्यत्राऽपि च विद्वज्जनानेव स्वसिद्धान्तग्रहणाय पुरस्कुर्वन्त्यभ्यर्थयन्ते च महोदारचरित्रवन्तः श्रीमदाचार्य्यचरणाः । "सुज्ञेषु हस्तयुगलं पुरतो निधाय विज्ञापयामि मुरवैरिपदाब्जनिष्ठः । उच्छृङ्खलाऽपि[1] विवृतिर्मम[2] चिन्तनीया श्रीकृष्णपादयुगले विनिवेशिते" ति ।

---

१ उच्छृङ्खलत्वं मन्वानस्य गर्हायामपिः । २ मम नाऽन्यस्य । चिन्तनीया नोपेक्षणीया नाप्यापातत ईक्षणीया । ननु को विशेषो यस्मा अयमाग्रहस्तत्राऽऽहुः—श्रीकृष्णेत्यादि । श्रीकृष्णस्य परमतत्त्वता फलता मूलरूपता परब्रह्मता सेव्यता सा च बहिर्भजनरूपैव मुख्येत्यादि श्रीमदाचार्य्यचरणैरेव केवलैर्लोके प्रकटितमित्यन्यतो विस्तरः ।

विद्वन्मण्डने श्रीमत्प्रभुचरणा अपि—"श्रुतिसूत्रादिमणिभिर्जटितं युक्तिमौक्तिकैः। ग्रथितं कुरुते विद्वन्मण्डनं विठ्ठलः सुधीरि" ति "ब्रह्मवादे कृतात्मानः प्राप्नुवन्तु हरिं बुधा" इति "वरीवर्त्ति श्रद्धा श्रुतिषु यदि वा व्यासवचने तदा विद्वांसोऽस्मद्भिरचितमिदं मण्डनवरम्। यथोक्तं कण्ठे वा शुकवदथवाऽर्थश्च हृदये मुदा कृत्वाऽऽयत्तं धुनुत रिपुपक्षाभिधतमः" इति च विद्वज्जनानेवाऽपेक्षन्तेऽभिमुखीकुर्वन्ति समाद्रियन्ते च।

तेन प्रवृत्तिप्रचारप्रकाशादिना सन्मार्गरक्षा विद्वज्जनाधीनैव। मूर्खजनसमवायस्तु गतानुगतिक इति स्वमतपरीक्षातदादरतद्ग्रहणधारणप्रचारप्रकाशादिषु साक्षात्स्वातन्त्र्येणाऽनुपयुक्तः। शिष्टादृतमेव च मतमृतमित्यवयन्त्यनुसरन्ति च प्रेक्षावन्तो न तु तैः परिहृतमशिष्टगोष्ठीगृहीतमपि। विद्वांस एव च शिष्टास्तत्र तत्र परिभाषितस्वरूपाः। तस्माद्विद्वज्जनावर्जनं साम्प्रदायिकैः सर्वथाऽप्यनुपेक्ष्यमिति श्रीमदाचार्य्यचरणश्रीमत्प्रभुचरणानां निरन्तरादिगन्तरसन्तन्तः समन्ततः स्वीयान् प्रत्युपदेशः स्फुटतरं प्राञ्जलः प्रकाशतेतमाम्।

परप्रोत्साहनाय प्रकृतोपयोगि श्रीमदाचार्य्यचरणश्रीमत्प्रभुचरणतदुक्तितत्सिद्धान्तानां स्वरूपमपि परमाप्तत्वादिरूपं निगूढसरसचमत्कृताशयत्वादिरूपं प्राकृतादित्यवैलक्षण्येन परावरचराचरप्रकाशकसर्वातिशायिप्रकाशशालित्वादिरूपञ्च वस्तुभूतमेतावतैव दिङ्मात्रेण निदर्शितं वेदितव्यम्।

तेषान्तदुक्तीनां तत्सिद्धान्तस्य च तादृशत्वे मानं तु मूढैर्मृग्यं न विद्वद्भिस्तेषां स्वयं परीक्षकत्वात्तद्धृदयङ्गमत्वौपयिकनिखिलगुणगणाकरत्वाच्च तद्ग्रन्थानाम्। अन्यथा तद्दर्शनाद्यर्थाय तेषामभिमुखीकरणायोगात्।

अभिमुखीकरणादिना च विद्वद्भिरमात्सर्य्येण तद्ग्रन्थाननुशीलने तेषां खेदोऽपि सम्भवेदित्यापतति । यथाऽऽहुर्लौकिकाः—"विद्वांसो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः । अबोधोपहताश्चाऽन्ये जीर्णमङ्गे सुभाषितमि" ति । "लोकवत्तु लीलाकैवल्यमि" ति न्यायात् ।

तेन निर्मत्सरैर्विद्वज्जनैरवश्यमेव परिशीलनीयाः श्रीमदाचार्य्यचरणश्रीमत्प्रभुचरणानां ग्रन्थाः समुच्छेत्तव्याश्च तैरेव स्वेषामन्येषाञ्च ते ते सर्वेऽपि संशयाः समादरणीया धारणीया अनुसरणीयाश्च तदाशयाः प्रवर्त्तनीयाश्च तदादरणधारणानुसरणेषु यथाशक्यं सर्वेऽपि जीवास्तदेव जगतां मङ्गलं मण्डनञ्चापि विदुषां तदेवेति प्रकटमेतत् ।

पद्यान्यपीह मत्कृतानि कानिचिदवधेयानि भवन्तु । तथाहि—

गूढा गभीरा गहना गुर्वी मृद्वी मधुः शुचिः ।
विविक्तवर्णा विशदा श्रीमदाचार्य्यवाक्सुधा ॥ १ ॥

यन्मानुष्यं तदतिविरलं मार्मिकैरभ्युपेयं
तत्राऽपेक्ष्यः पुरु परिणतः शास्त्रसंविद्विशेषः ।
अर्ध्यस्तत्राप्यधरितसुधाधामकाशः प्रकाशः
शब्दार्थाभ्यामथ मधुमुचः श्रीमदाचार्यवाचः ॥ २ ॥

हृदयमुपेयतां प्रथमतो विमलावयवं
विशदनुदारमुन्नतमसन्नगुणाभिरुचि ।
अथ परिशील्यतां सुखमनन्तरसानुसृतं
विगलितबाह्यवित्ति च महाप्रभुपादवचः ॥ ३ ॥

---

१ अर्थतो गुणानाह । गूढा रत्नराशिवत् । गभीरा आनन्त्याज्जलधिवत् । गहना सहसा प्रवेशासम्भवात् । गुर्वी सर्वातिशायित्वरूपाद्गौरवात्परावरव्यवस्थाप्रदर्शकत्वाच्च । मृद्वी अक्लिष्टत्वात् । मधुः रसनीयत्वान्मादकत्वाच्च । शुचिर्बाह्याभ्यन्तरशोधकत्वात् । स्फुटमन्यत् । २ सुधाधामा चन्द्रः । स एव काशो निष्प्रभत्वात् ।

वाचः पीयूषदर्पप्रतिभटघटनापाटवाटोपपुष्टा
अर्थश्चाऽऽसामतान्तस्तरणितरुणिमोद्रेकानिर्मञ्छनीयः ।
व्युत्पत्तिश्चाऽत्र गोपीपरिवृढवदनाम्भोजभावोपलब्धि-
रित्थं श्रीवल्लभाधीश्वरमुखमधुनः स्फुर्तिमन्तः स्मरेम ॥ ४ ॥
वल्लभेन्दुवचनामृतसेकश्छेकदर्शितविशेषविवेकः ।
अस्तु नः शंकलितव्यतिरेकः कस्य नह्यति न वस्त्वतिरेकः ॥ ५ ॥
श्रीवल्लभाधीश्वरवाक्प्रवाहावगाहनिर्वाहनिरस्ततापः ।
लीनोऽतिपीनेऽनुगृहीतदीने रसे नवीने विहरामि शश्वत् ॥ ६ ॥
श्रीमद्वल्लभदेशिकेन्द्रवदनाम्भोजस्रवन्माधुरी-
माध्वीकोन्मदमानसैकसुगमोन्मेषैर्विशेषैर्युतः ।
श्रीमद्गोपवधूहृदन्तरलुठद्भावाब्धिसर्वस्वभूः
श्रीकृष्णस्य निरन्तरेण मनसा सेवारसः प्राप्यताम् ॥ ७ ॥ इति ।

श्रीमत्प्रभुचरणास्तु श्रीमदाचार्य्यचरणार्जितं महोच्चतममाचार्य्यसिंहासनमधिरूढा ऊर्ध्वबाहवो भूत्वेव निखिलं जगदेव समन्ततः सम्बोधयन्तः संश्रावयन्ति च पर्य्यनुयुञ्जते च यत्—

क्वचित्पाण्डित्यं चेन्न निगमगतिः सापि यदि न
क्रिया सा सापि स्याद्यदि न हरिमार्गे परिचयः ।
यदि स्यात्सोपि श्रीव्रजपतिरतिर्नेति निखिलै-
र्गुणैरन्यः को वा विलसति विना वल्लभवरम् ॥ १ ॥

क्वचित् बुद्धादौ पाण्डित्यं चेत्? न निगमगतिः । बुद्धेन तद्दूषणात् । सापि निगमगतिरपि क्वचित् जैमिन्यादौ यदि? न क्रिया सा निगमाभिमता । "ब्रह्मण्याधाय कर्माणि" इति

१ पीयूषस्य दर्पेण यः प्रतिभटघटनापाटवाटोपः साम्याभिमानेन प्रतिवस्तुतया स्थितये चातुर्य्याडम्बरश्चाश्चल्याविशेषस्तेनैव पुष्टाः साधितोत्कर्षा इत्यर्थः । २ इत्थं स्फूर्तिमन्त इति सम्बन्धः । ३ निरन्तरसम्बद्ध इति यावत् । ४ नवीनत्वमुत्तरोत्तरमासक्तिकारित्वात् । ५ "प्राधान्येन व्यपदेशाः" "मुख्ये सम्प्रत्ययः" इति न्यायाभ्यां माधुर्य्यप्राधान्यविवक्षया द्रव्यानुल्लेखः । सैव माध्वीकं मादकत्वात् ।

"यत्करोषि यदश्नासि" "कायेन वाचा मनसेन्द्रियैर्वा" "ब्रह्मार्पणं ब्रह्महविरि" त्यादेश्च विरोधात् । सापि निगमाभिमता क्रियाऽपि क्वचित् श्रीशङ्कराचार्य्यसिद्धान्तानुगे व्यावहारिकसत्तया यदि ? न हरिमार्गे भक्तिमार्गे परिचयः । यदि सोऽपि हरिमार्गे परिचयोऽपि क्वचित् श्रीमद्वेदव्यासे श्रीशुके श्रीरामानुजादिसिद्धान्ते चाऽस्ति ? तेषु व्रजपतिरतिर्नास्ति । व्रजस्य सर्वथा निःसाधनस्य "अन्ह्यापृतं निशि शयानमतिश्रमेण लोकं विकुण्ठमुपनेष्यति गोकुलं स्वमि" त्यादिना "ते नाऽधीतश्रुतिगणा नोपासितमहत्तमा" इत्यादिना च विवृतस्वरूपस्य पतिः सर्वात्मना सर्वरक्षकः । "तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम् । गोपाये स्वात्मयोगेन सोयं मे व्रत आहित" इत्यादिवचनात् । तेन केषाञ्चिच्छ्रीकृष्णभक्तत्वेऽपि साधननिष्ठावत्त्वाद्व्रजपतिरतिमत्त्वं न सिद्ध्यतीति ज्ञेयम् । ननु भोः व्रजपतिरतिर्व्रजसीमान्तिनीष्वस्तीति तत्साम्यमाचार्य्येष्वायातमिति चेत् ? बाढमुक्तं तत्साम्यमाचार्य्येष्वस्तीति । यतस्तन्मार्गप्राकट्यायैव मुख्यतया श्रीमदाचार्य्यचरणानां प्रवृत्तिरिति । तथापि पाण्डित्यनिगमगतिताद्दशक्रियाहरिमार्गपरिचयरूपा विशेषाः श्रीमदाचार्य्यचरणेषु समुल्लसन्तस्तास्वपि न भवन्तीत्यत उक्तम्—इति निखिलैर्गुणैरन्यः को वा विलसति विना वल्लभवरामिति ।

सर्वोऽप्यसौ विशेषः पण्डितप्रज्ञैकप्रकाश्यः पण्डितैः सहकारिभिः कृत्वैव च लोकेऽपि प्रकटनीय इति विदुषामेव तदर्थमपेक्षा न मूर्खमण्डलस्येति नूनमभिप्रेत्यैव श्रीमत्प्रभुचरणैर्विद्वन्मण्डनग्रन्थप्रणयनमित्यवधेयम् । तच्च क्वचित्पाण्डित्यश्लोकोक्तप्रकारेण निष्कृष्टश्रीमदाचार्यचरणमुख्यासिद्धान्तादर्शबिम्बायितम् ।

श्रीमदाचार्यचरणैर्हि साकारब्रह्मवाद एव मुख्यत्वेन स्वसिद्धान्तः स्थापितः। अष्टादशभिर्विद्याभिः प्रमाणतः प्रमेयतः साधनतः फलतश्च ब्रह्मातिरिक्तपदार्थाभावनिर्णयेन सर्वसमन्वयो ब्रह्मण्येवेति। ब्रह्मवादैकदेशित्वमेव च तेषां तेषां सर्वेषामपि वादानाम्। यच्च मूलं ब्रह्म चराचरप्रपञ्चरूपेण परावररूपेण दैवासुरसर्गरूपेण अहिनकुलन्यायेन परस्परात्यन्तविरुद्धपदार्थधर्मरूपेण तथैव स्वर्गापवर्गनरकादिविलक्षणसाधनरूपेण तादृशतत्फलरूपेण च सर्वतः "पटवच्चे" ति सूत्रानुसारेण चिक्रीडिषया विस्तीर्णं यदज्ञाने सर्वमौढ्यं यस्मिन् विज्ञाते च सर्वमिदं विज्ञातं भवति साक्षात्तल्लाभस्तु तदनुग्रहैकलभ्यया भक्त्या न साधनान्तरैः प्रमाणोक्तैः प्रमाणबलरूपैः। लभ्यस्वरूपं च रसात्मकं रसवच्च शोभाद्भुतदर्शनार्द्रविस्मयस्तिमितमानसकुटीरोदितलज्जावैवश्यनतमस्तकमनसिजसहस्रलावण्यसलिलक्षालितचरणारविन्दनखचन्द्रं साकारमिति च तत्संक्षेपः। श्रीमत्सर्वोत्तमस्तोत्रे—" साकारब्रह्मवादैकस्थापक " इति ह स्माऽऽहुः श्रीमदाचार्य्यचरणानां नाम श्रीमत्प्रभुचरणाः।

स्थापनं नाम सर्वशास्त्राणां व्याख्यानादिना मतान्तरानिराकरणपूर्वकं तत्तात्पर्य्यकत्वप्रदर्शनं तात्कालिकैः सर्वैर्वादिभिस्तद्ग्राहणञ्च। तच्च दक्षिणापथस्थितविद्यानगराधीश्वरस्य श्रीकृष्णदेवराजस्याऽऽस्थान्यां प्रवर्त्तमाने वादयुद्धे 'मायावादनिराकर्तृभिः' 'सर्ववादिनिरासकृद्भिः' 'वेदपारगैः' किलाऽनुष्ठितमाचार्य्यचरणैः। तथैव च त्रिः पृथ्वीं परिक्रम्य दिग्विजयान् विदधानैः, श्रीकाशीविश्वेश्वरमन्दिरद्वारे स्वर्भूदेववृन्दवन्दनीयालिन्दे विद्वन्निकुरम्बनयनारविन्दवन्दनमालिकाभिरहर्निशमाबद्धतोरणे पत्रावलम्बनादिभिः, प्रमाणचतुष्टयाविरोधरूपया युक्त्या सर्वशास्त्रव्यवस्थापनादिना, तद्व्याख्यानादिना च यथा-

वदपेक्षितयावत्सामग्रीसम्पादनपूर्वकं समनुष्ठितमित्यातिरोहितम् ।

तत्प्रचारस्तु श्रीमत्प्रभुचरणैः कर्त्तव्यः । प्रचारो नाम सर्वदेशदिशाकालेष्वव्याहतगतित्वम् । यद्वा, पण्डितेषु प्रवृत्तिः स्थापनम् । " नमः पितृपदाम्भोजरेणुभ्यो यत्प्रसादतः । भक्तिः प्राप्ता तदन्याध्वमोहाभावश्च पण्डितैरि " ति भक्तिहंसीयान्मङ्गलश्लोकात् । आ पामरं प्रवृत्तिः प्रचारः । स च न तत्र गुणान्तराधानेन कर्त्तव्यः । न्यूनताराहित्यात् । अन्यथा स्थापनमेवाऽसम्भवि का कथा तत्प्रचारस्येति । किन्तु चक्षुरादिसत्त्वेऽपि तदनुग्राहकसूर्याद्यभावे जनप्रचारप्रतिबन्धवच्छ्रीमदाचार्य्यचरणैरुपसंहृते स्वस्वरूपेऽनुग्राहकाभावेन तमस्तमस्तोमसम्भवे तन्निरासादिना सूर्य्यवदिति । तथैव च कृतं विद्वन्मण्डनादिभिर्ग्रन्थैः श्रीमत्प्रभुचरणैः । सिध्यति चैतद्विद्वन्मण्डनाद्वितीयश्लोके—"पितृचरणान्नत्वाऽहं हरिरतिमार्गाम्बुजातमार्त्तण्डान् । तदनुग्रहतः किञ्चिल्लिखामि यत्नाद्यथाबुद्धी " त्यत्र मार्त्तण्डतदनुग्रहादिपदैः ।

सुवर्णसूत्रे विद्वन्मण्डनमवतारयन्तः श्रीमत्पुरुषोत्तमा अपि प्रथममङ्गलावतरणिकायामाहुः—" इह हि श्रीमत्प्रभुचरणाः स्वीयानां मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादाप्रचारजनितं खेदमसहमानास्तन्निरासाय विद्वन्मण्डनं कुर्वन्तः स्वमार्गस्याऽतिगोप्यत्वं सकलप्रमाणमूर्धन्यश्रुतिसिद्धत्वञ्च ज्ञापयन्तस्तदभिज्ञापकं मङ्गलवाक्यं ग्रन्थारम्भे शिष्यशिक्षायै निबध्नन्ति " इति ।

भक्तिपदं श्रीकृष्णस्नेहे मुख्यमन्यत्र तु तद्धेतुत्वेन तत्प्रयोगो भाक्त इति भक्तिहंसे स्थितम् । तेन फलात्मकस्नेहलक्षणो भक्तिमार्गो मुख्यभक्तिमार्गः ।

किञ्च । "श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् । इति पुंसाऽर्पिता विष्णौ भक्तिश्चेन्नवलक्षणे" त्यत्र "भक्त्या सञ्जातया भक्त्ये-" त्यादिना स्नेहात्मकभक्तिहेतुतया भक्तिपदस्य लाक्षणिकत्वेऽपि स्नेहवशेन क्रियमाणानां श्रवणादीनां स्नेहमध्यपातितया गङ्गाप्रवाहान्तःपातिबाह्योदकवत्स्नेहरूपत्वे लाक्षणिकत्वाभावेन तादृशश्रवणादिरपि मुख्यो भक्तिमार्गः । फलात्मकत्वात्फलस्यैव मुख्यत्वाच्च ।

मुख्यफलप्रापकत्वादपि श्रवणादीनां मुख्यभक्तिमार्गत्वम् । साक्षात्पुरुषोत्तमतत्स्नेहौ च मुख्यं फलम् । "साक्षात्पुरुषोत्तमप्रापकत्वेन विहितत्वं भक्तिपदप्रवृत्तिनिमित्तं श्रवणादिषु भिन्नमि" ति "तथैव तद्वरणादि" ति भक्तिहंसफक्किकयोरेतात्स्थितम् । एवञ्च भगवल्लाभतत्स्नेहहेतुतयाऽनुष्ठीयमानेष्वपि श्रवणादिषु मुख्यया वृत्त्या भक्तिपदस्य प्रवृत्तिव्यवस्थापनान्न भक्तिपदप्रयोगस्तत्रौपचारिकः किन्तु मुख्य इति तद्धेतुतयाऽनुष्ठितानामपि श्रवणादीनां मुख्यभक्तिमार्गता निःप्रत्यूहा ।

अपि च । स्नेहाभावे स्नेहवदुपदेशस्य भक्तिहंससमाप्तौ नियामकत्वव्यवस्थापनात्तद्वदुपदेशानुसारेण क्रियमाणानां श्रवणादीनां स्नेहमार्गीयत्वादपि तथा ।

अपरञ्च । मायावादिमते—"एकमेवाऽद्वितीयं ब्रह्म" "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" "अस्थूलमनणवह्रस्वमि" त्यादिभिः श्रुतिभिः सर्वविशेषशून्यतया श्राविते ब्रह्मणि प्रपञ्चतत्कर्त्तृत्वादिविशेषाणामाध्यासिकतया प्रपञ्चान्तःपातिनां वेदादिसच्छास्त्रतदुक्तपूर्वोक्तप्रकारकश्रवणादिसाधनाचरणतद्बोधितफलानामज्ञानकल्पितत्वम् । तथैव च भजनीयत्वोपयुक्तविशेषाणामपि सौन्दर्य्यमाधुर्य्यसौशील्य-

सौलभ्यदयालुत्वपारमैश्वर्य्यादीनां मिथ्यात्वम्।तथा सति भजनीयस्वरूपप्राप्यस्वरूपतल्लाभोपयोगिसाधनादिसमस्तसामग्रीस्वरूपाणामपारमार्थिकत्वसिद्ध्या कथञ्चन चित्तशुद्ध्यादिहेतुत्वमेव मुख्यभक्तिमार्गस्याऽपि । तदप्याज्ञानिकं न पारमार्थिकमित्याज्ञानिकत्वाऽऽन्तरालिकत्वाभ्याममुख्यतैव। "ज्ञानादेव तु कैवल्यमि" त्यादिना निर्विशेषज्ञानस्यैव च मुख्यता । तद्व्यावर्त्तनायाऽन्यत्र मुख्यपदम् । तेन भजनतत्प्रकाराणां भजनीयतत्प्रकाराणाञ्च नाऽज्ञानकल्पितत्वं किन्तु सत्यत्वमिति सकलश्रुतिसमन्वयसिद्धतया यथार्थज्ञानपूर्वकत्वम् । तत्रापि भगवदनुग्रहैकलभ्यतया भगवज्ज्ञानपूर्वकत्वम् । ब्रह्मातिरिक्तपदार्थासिद्ध्या सर्वस्य ब्रह्मात्मकत्वेन च सत्यज्ञानानन्तरूपत्वमेव । नापि फलतोऽप्यान्तरालिकत्वमिति तत्र मुख्यत्वमबाधितम् ।

ब्रह्मवादस्य तादृशभक्तिमार्गोपयोगित्वन्तु माहात्म्यज्ञानजननद्वारा भगवल्लाभसाधनेषु श्रवणादिषु प्रवृत्तस्य स्नेहोदयावश्यम्भावात्पारम्परिकम्।भक्तिमार्गीयफलतत्प्रकारतत्साधनतत्प्रकारतदितिकर्त्तव्यतानां ब्रह्मात्मकत्वादिना सत्यतया साक्षात् । पूर्णरसात्मकपुरुषोत्तमभजने प्राकृतपदार्थानां "प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूय" इति हीनगुणतयाऽनुपयोगो ब्रह्मात्मकत्वे तु तदाधिदैविकत्वपर्य्यन्ततायां तैः पदार्थैस्तद्भजनमुपपद्यत इत्यत्यन्तरङ्गमुद्रयाऽपि । मायावादतदुपलक्षितसर्ववादनिरासेन च प्रतिबन्धनिवृत्तिद्वारा ताटस्थ्येनाऽपि।

एवञ्च मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादेति साकारब्रह्मवादस्वरूपमेव निष्कृष्टं श्रीमत्पुरुषोत्तमैरिति ज्ञेयम् । आकारपदमप्राकृतसर्वविशेषोपलक्षकम् ।

सर्वविशेषशून्ये हि ब्रह्मणि न माहात्म्यसिद्धिर्न प्रापञ्चिकानां पदार्थानामज्ञानकल्पितत्वादिना पारमार्थिकभजनसिद्धिर्नाप्याधिदैविकत्वं पदार्थानां नापि च मुख्यभक्तिमार्गलाभः। सर्वविशेषोपपत्तावेव तु सर्वमेतत्सुसिद्धम्।

तदेवाऽऽहुः श्रीमदाचार्य्यचरणाः—"प्रपञ्चो भगवत्कार्य्यस्तद्रूपो माययाऽभवत्। तच्छक्त्याऽविद्यया त्वस्य जीवसंसार उच्यत" इत्येतत्स्वकारिकाव्याख्याने—"प्रपञ्चमेव मिथ्येत्युक्त्वा शुद्धं भजनं वारयन्ति। तथाऽन्ये जीवं व्यापकमुक्त्वा। अत उभयनिराकरणार्थं जीवजडयोः स्वरूपमुच्यते" इति।

व्याख्यातञ्चैतच्छ्रीमत्पुरुषोत्तमैः। तद्यथा—"नन्विदं भक्तिप्रतिपादनार्थं बाधकशास्त्रनिवृत्त्यर्थं च शास्त्रमारब्धम्। तद्विहाय प्रथमतः प्रपञ्चस्वरूपं किमिति विचार्य्यत इत्याकाङ्क्षायामाहुः—प्रपञ्चमेवेत्यादि। उच्यत इति। अत्र ब्रह्मवादे प्रपञ्चस्य भगवत्कार्यतया जीवान्तर्यामिणोर्ब्रह्मांशतया च ब्रह्माभेदः साधनीयः। साधनान्तरापेक्षया भक्तेर्मुख्यत्वं ब्रह्मणश्च साकारत्वं तत्प्राकट्यस्यैव फलत्वं च साधनीयम्। तदर्थं मतान्तरं प्रथमतो निराकर्त्तव्यम्। तत्रापि प्रपञ्चस्य मिथ्यात्वमेकदेशिमत इति गृहप्रविष्टचौरवत् तन्निराकरणं ततोऽपि पूर्वं कर्त्तव्यमित्यतः प्रातिलोम्येनेयं कथनप्रतिज्ञे"ति।

शुद्धं भजनं नाम ब्रह्मात्मकतया सत्यैः साधनैः सत्यफलाय सत्यात्मकं भजनम्। परमतेऽज्ञानकल्पितत्वादशुद्धं भजनम्। तच्च प्रपञ्चमिथ्यात्वेन जीवव्यापकत्ववादेन च। प्रकृते तु ब्रह्मवादेन प्रपञ्चसत्यत्वे जीवस्यांऽशत्वे च सिद्धे शुद्धं भजनम्। फलात्मकत्वाधिदैविकत्वे अपि शुद्धपदेन सङ्ग्राह्ये। साधनस्पर्शेन फलाशया च विमिश्रं भजनं न शुद्धम्। अनन्यं

हि भजनं शुद्धम् । तच्च फलात्मकतया स्वतन्त्रपुरुषार्थरूपत्व एवेति । किंच । आधिदैविकस्य पूर्णरसात्मकस्य श्रीकृष्णस्य भजनेऽनाधिदैविकपदार्थोपयोगेऽपि न शुद्धं भजनं सिद्ध्यति। तत एवाऽऽहुः श्रीमदाचार्य्यचरणा उक्तायां कारिकायाम्— "भगवत्कार्य्यस्तद्रूप" इति । व्याख्यातश्च तैरेव प्रकाशे— "भगवत्कार्य्यः परमकाष्ठापन्नवस्तुकृतिसाध्यः । तादृशोऽपि भगवद्रूप" इति । भगवत्पदं परमकाष्ठापन्नवस्तुवाचकमिति भगवद्रूपपदेन परमकाष्ठापन्नवस्तुरूपत्वे सिद्धे स्फुटमाधिदैविकत्वमिति । तेन शुद्धपदं मुख्यपदपर्य्यायरूपम् । साक्षात्पुरुषोत्तमलाभतद्धेतुतत्स्नेहहेतुतयाऽनुष्ठितैः श्रवणादिभिर्भजने भक्तिपदप्रयोगस्य मुख्यत्वेऽपि फलात्मकत्वाभावेनाऽमुख्यत्वशङ्का तु स्नेहवदुपदेशनियम्यतया स्नेहमार्गीयत्वव्यवस्थापनप्रदर्शनेन प्राक् सूचितनिराकरणेति स्नेहवद्भिश्चाऽनन्यस्यैव भजनस्य स्वतन्त्रपुरुषार्थतयैव च तदनुष्ठानस्योपदेश इति साक्षाच्छ्रीकृष्णलाभतत्स्नेहहेतुतयाऽनुष्ठितानामपि श्रवणादीनां शुद्धत्वं निर्बाधमित्यन्यत्र विस्तरः। विस्पष्टयितव्यश्चोपरिष्टादेतत्।

एवञ्च मुख्यभक्तिमार्गस्य साकारब्रह्मवादचरमकक्षाविश्रान्ततया ब्रह्मवादासिद्ध्या भक्तिमार्गासिद्धिस्तत्सिद्ध्यैव च तत्सिद्धिरित्यन्वयव्यतिरेकाभ्यां ब्रह्मवादस्य मुख्यभक्तिमार्गोपयोगित्वं प्रस्फुटतरमिति सुष्ठूक्तं श्रीमत्पुरुषोत्तमैः—"मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादाप्रचारजनितमि" त्यादि साध्वेव च निष्कृष्टं श्रीमदाचार्य्यचरणसिद्धान्तस्वरूपमिति विदाङ्कुर्वन्तु विवेकिनो विद्वज्जनाः ।

ग्रन्थाशयप्रविविक्षानुकूल्येन तद्द्वारदर्शनार्थकतया मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादस्वरूपदिङ्मात्रमिहोक्तं वस्तुतस्तु

मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादप्रचारायैव श्रीमदाचार्य्यचरणप्रवृत्तिमनुसृत्य विद्वन्मण्डनकरणमिति तदध्ययनाध्यापनतदनुशीलनादिना समस्तसंशयोच्छेदपूर्वकं तदुभयस्वरूपतत्पारस्परिकसम्बन्धानुसन्धानं तत एव प्रस्फुटतरं भवतीति तदेव समनुशील्यतां विद्वज्जनैः ।

" आचार्य्यवान् पुरुषो वेदे " ति श्रीमदाचार्य्यचरणश्रीमत्प्रभुचरणपादारविन्दानुध्यानधौतया धियाऽनुशीलिताद्विद्वन्मण्डनतोऽस्मान्मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादस्वरूपं हृदयादर्श आसज्जत इव नयनयोः पुरस्तान्मूर्त्तमभ्युत्तिष्ठत इव तेन च तिरोहिताशेषक्लेशाविशेषं परमफलात्मकरसैकरससर्वस्वभगवत्स्वरूपतद्भजनानन्दसन्दोहानुभवसुखातिशयविस्मृतसमस्तप्रपञ्चं मनस्तन्मयं तन्मात्रञ्च भवतीवेति ।

अन्यच्च । ब्रह्मात्मकस्य ब्रह्मकार्य्यस्य च प्रपञ्चस्य परावरव्यवस्थायां ब्रह्मविद एवाऽधिकारस्य नाप्राप्ततया ब्रह्मविदैव च मुख्यफलाविरोधेन सर्वसेतूनां सामञ्जस्येन शक्यसंरक्षणत्वाद्ब्रह्मविदामेव च मन्वादिमुनीनां तथा सर्वसामञ्जस्यपुरस्सरं सर्वसेतुसंरक्षणस्य वेदेतिहासस्मृतिपुराणेषु भूयो भूयो निदर्शनाच्च तथाविधस्य ब्रह्मविदः सम्प्रत्यभाव एव जगतः समस्तसेतूनामिदानीन्तन उच्छेदे धर्मभ्रंशे भगवत्सेवनप्रवृत्तिमान्थर्य्यादौ सच्छ्रद्धाशैथिल्यादौ दारिद्र्यदुर्मरणदुर्भिक्षादौ च निदानं पुनर्यथावत्तदवस्थापनव्यवस्थापनाद्यभावे च स एव हेतुः। स च निम्बन्धविद्वन्मण्डनसदृशग्रन्थानुशीलनतदाशयधारणादिना सति भगवत्सङ्कल्पे सर्वथैव सूद्धरो न त्वंशतोऽपि दुरुद्धर इत्यनुसन्धेयमेतत् ।

नहि मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादनिरूपणं पाषण्डिनां

मतमिव स्वार्थाद्यर्थाय दुराग्रहग्रहिलं वाचाऽऽरम्भणञ्च । किन्तु यथार्था वस्तुस्थितिरिति ।

तेन य इदानीन्तना दुरुच्छेदास्ते ते लौकिकाः क्लेशा यदुच्छेदाय प्रवर्त्तमानानां तेषां तेषां लौकिकविदुषामनेकेषां सङ्क्षयोऽभूद्भवति च न तु तदुच्छेदस्ते सर्वेऽपि समूलमेवोत्सीदेयुर्यदि लभ्येत भगवत्कृपया निबन्धविद्वन्मण्डनादिभिर्विवक्षितस्वरूपो ब्रह्मविद् । यावच्च तदलाभस्तावदाशामोदकचर्वणमेव जना अनुसरन्तु कामं न तु तन्मनोरथाभिपूर्त्तिस्वप्नोऽपीति तु भाग्यबुद्धिदोषादनाकर्णितकेऽपि भूयो भूय उद्घोष्यतेतमामस्माभिः ।

सम्प्रति तादृशस्य ब्रह्मविदो लाभस्तु न तावन्निबन्धविद्वन्मण्डनादीनां यथाकथञ्चन विलोकनादिमात्रेण किन्तु तेषां मीमांसामूलतया मीमांसारूपत्वात्तन्मीमांस्यवेदादिप्रमाणचतुष्टयतदविरोधव्यवस्थापनीयसकलशास्त्राणामध्ययनपूर्वकं तैः सर्वसन्देहनिरासतदुक्तानुष्ठानतथातदुपदेशादिभिः ।

तत एवाऽऽहुर्निबन्धे शास्त्रार्थप्रकरणसमाप्तौ श्रीमदाचार्य्यचरणाः—वेदरामायणादिभिर्मुख्यभक्तिमार्गतदुपयोगिब्रह्मवादैकनिर्णयम् । तद्यथा—

“ अर्थोऽयमेव निखिलैरपि वेदवाक्यै
रामायणैः सहितभारतपञ्चरात्रैः ।
अन्यैश्च शास्त्रवचनैः सह तत्त्वसूत्रै
र्निर्णीयते सहृदयं हरिणा सदैव ” ति ।

श्रीमदाचार्य्यचरणैस्तावद्वेदरामायणादिप्रमाणगणग्रहणेनैव सर्वसन्देहनिरासद्वारा भगवद्धर्मो जगति प्रवर्त्तितः । तयैव रीत्या यदीदानीमपि तत्र तत्र सर्वसाधारणप्रसिद्धवेदरामायण-

महाभारतपञ्चरात्रमन्वादिभिस्तात्पर्य्यनिर्णयलिङ्गानुगृहीतैः प्रमाणचतुष्टयाविरोधव्यवस्थितैः स्वसिद्धान्तरूपास्तद्व्याख्यानोपदेशादयः प्रवर्त्तेरंस्तर्हि नूनमञ्जसैव स्वधर्मप्रवृत्तिः सकललोकश्रेयस्करी सर्वत्र सम्पद्येत । परमानभिज्ञजनमूर्धन्यानां ते ते आक्षेपा—यथा सत्सम्प्रदाया अपि वेदबाह्यपाषण्डिमतवत्स्वार्थप्रतिष्ठादिलालसया कल्पिता दुराग्रहग्रस्ततयाऽन्तर्वस्तुशून्या मतविशेषा एवेत्यादयस्ते सर्वेऽपि तथा तथा तद्व्याख्यानादिभिः साङ्गोपाङ्गसनातनधर्ममुख्यस्वरूपनिरूपणमुखेन तच्चरमकक्षाविश्रान्ततया मुख्यभक्तिमार्गग्राहणे सति समूलं विलीयेरन् । तथा सति श्रीमद्भगवद्वागधीशत्वादिना तत्रतत्राऽभिष्टूयमानं श्रीमदाचार्य्यचरणस्वरूपञ्च लोकाः प्रस्फुरत्तमं पश्येयुः ।

तस्माद्विद्वन्मण्डनाध्ययनाध्यापनपरिशीलनादिना विद्वज्जनेष्वेव विशेषतः प्रवर्त्ततामप्रतिहतप्रचारः सर्वतोऽपि साकारब्रह्मवादस्तथाऽध्यवसीयतां व्यवसीयताञ्चाऽपि तथा साम्प्रदायिकैरिति सानुरोधमेतद्विज्ञाप्यते ।

अधुना तु तादृशस्य विद्वज्जनैकरसनीयस्य तदेकविज्ञेयविशेषस्य तदितरदुर्धरस्याऽपि श्रीमदाचार्य्यचरणसिद्धान्तस्य भगवदिच्छया मूर्खपर्य्यवसानं जातमिति श्रीमदाचार्य्यचरणश्रीमत्प्रभुचरणानां साक्षाद्ग्रन्थानुशीलने निरस्ते तदनुवादादिनैव च यथाकथमपि तद्ग्रहणे सर्वथैव नूनमद्यत्वेऽन्यथितस्वरूपस्तत्सिद्धान्तः प्रत्युत परितोऽपि प्रवृत्तह्रासरासः कस्य वा सचेतसो हृदयं न शतधा नयति, केषां वा प्रेक्षावतामहृदयङ्गमीभूय तदभिरुचिप्रवृत्ती नाऽभिरुणद्धि ।

तथाहि । भगवत्प्राप्तिस्तत्साक्षात्साधकमुख्यभक्तिश्च भगवदनुग्रहैकसाध्यतया प्रमेयबलरूपा न प्रमाणोक्तैः प्रमाणबलरूपैः

साधनैः साध्येति, श्रीमदाचार्य्यचरणैश्च श्रीमद्व्रजसीमान्तिनीनां फलतन्मार्गयोरेव प्राधान्येन प्राकट्यं कृतं, तत्रैव सकलशास्त्राणां तात्पर्य्यपर्य्यवसानं च प्रदर्शितमिति, व्रजपतिरतिर्यथा व्रजस्थानामुत्पत्त्या चोपपत्त्या च प्रमाणास्पृष्टा तथैवेदानीमपि श्रीमदाचार्य्यानुगानाम् । तेनाऽस्मिन् सिद्धान्ते पाण्डित्याद्यनुपयोगः । एवञ्च वेदादेः प्रामाण्यादिस्वीकारस्तच्छ्रद्धा च स्नेहैकरसाच्छुद्धिपुष्टिमार्गाद्भ्रंशायैव । मर्यादा हि सा । मर्यादा च पुष्टौ चाण्डालोदकस्पर्शप्रायेत्याद्यपसिद्धान्तराशीनुद्भावयन्तः श्रीमदाचार्य्यचरणश्रीमत्प्रभुचरणग्रन्थानपि प्रमाणपूरपूर्णानस्पृश्यतयेव परिहरन्ति । न श्रद्दधते नाऽऽद्रियन्ते नाऽपेक्षन्ते च । तथा सति कुतस्तरां वेदरामायणादिप्रमाणग्रन्थादरस्तेषु । कुतस्तरामपि च श्रीमदाचार्य्यचरणाभिप्रेता सार्वत्रिकी तत्सिद्धान्तप्रवृत्तिः । श्रीमदाचार्य्यचरणविरोधान्मार्गबहिर्भूता यूयमेव तथा परिहर्त्तव्या इति बलवद्गृहीतकण्ठास्तु—प्रमेयबलसाध्यस्य प्रमाणबलेनाऽत्यन्तविरोधात्प्रमाणोपपादितो यः स स्वसिद्धान्त एव न भवति । किन्तु प्रमाणच्छायामपि परिहृत्य प्रवर्त्तमानः शुद्धस्नेहैकरसो यः स स्वमार्ग इत्यास्थाय ब्रह्मवादादिषु विरुद्धांशबुद्ध्या तत्परित्यागेन तावन्मात्रांशे तत्परिग्रहमाहुः । अन्याश्च तदुपकरणभूतास्तास्ता उत्प्रेक्षाः प्रवर्त्त्य तदुपष्टभ्नन्ति । भजनानन्दोत्कर्षं निरूपयन्तोऽपि प्रमाणस्पर्शपरिहारेण सर्वा अपि मर्यादा अनपेक्षमाणाः समस्तसदाचारोच्छेदस्वैराचारयोः पर्य्यवसिताः परिणामतो विषयानन्द एव भजनानन्दं पर्य्यवसाययन्ति । साधयन्ति च विषयानन्दरूपान् स्वार्थान् । ततश्च शिष्टैरपरिग्रहप्रसङ्गो राज्ञाऽपि च निग्रहप्रसङ्गः । तेन च सर्वथाऽपि सम्प्रदायप्रमोष एव प्रसक्त इत्यहो बत महत्पापं कर्त्तुं व्यवसिता वयम् । विषयानन्दलो-

भाद्यद्भुन्तुं स्वमतमुद्यताः ! ! ! हरि हरि ! शान्तं पापम् ! ! अपहतममङ्गलम् ।

ब्रह्मवादं विना मुख्यभक्तिमार्गभजनीयत्वेन विवक्षितस्वरूपं ब्रह्मैव न सेत्स्यति किमुत मुख्यभक्तिमार्गप्रवृत्तिरिति हि ते न जानन्ति । प्रमाणोपपादितो यः स स्वसिद्धान्त एव न भवति । प्रमाणातीतः शुद्धस्नेहैकरसो यः स स्वसिद्धान्तः । प्रमाणांशपरित्यागेन स्नेहांशमात्रे च तदादर इति तु प्रलयान्धकारसन्धायी प्रबलतमोऽयं महाप्रमोहाभिभवः । हा हन्त हन्त श्रीमदाचार्य्यचरणश्रीमत्प्रभुचरणवचनेऽपि नष्टानामुक्तानुक्तदुरुक्तचिन्तेत्यहो अब्रह्मण्यमब्रह्मण्यम् । स्नेहांशस्याऽपि तत्र प्रमाणपूर्वकमेवोपपादनमिति तु क्व तेषां बोधः । तथैव प्रमाणपूर्वकमेवोपपादितस्य ब्रह्मवादस्य "सति कुड्ये चित्रमि" ति न्यायान्मुख्यभक्तिमार्गसिद्धिं प्रति प्रधानाङ्गतया मुख्यभक्तिमार्गेणैक्यम् । कुतस्तद्विघटनम् । येन प्रमाणांशपरित्यागेन स्नेहांशमात्रादरः सम्भवेदपीत्येतदपि तैरनवबुद्धमेव । स्नेहांशस्य शृङ्गारैकरसतया तत्र स्वरूपं विवक्षितमिति समस्तमर्यादोच्छेदेऽनधिकारिणां प्रत्युताऽसदुद्बोधकत्वेन सदाचारोच्छेदस्वैराचारप्रसङ्गाभ्यामुक्तया रीत्या सम्प्रदायविलोप एवाऽऽरभ्यते न तत्प्रवृत्तिरित्यपि स्वार्थान्धतया ते नाऽनुसन्दधति ।

तस्मात्तन्मोहात्याहितपरिहाराय सम्प्रदायप्रमोषाप्रसक्तये सिद्धान्तस्वरूपसंरक्षणाय तत्प्रमोहन्यायेनाऽन्येषां भ्रमाद्यनुत्पत्तये विद्वन्मण्डनस्य सुलभप्रवेशत्वाय च सकलशास्त्रसमन्वयसिद्धं यादृशं श्रीमदाचार्य्यचरणसम्प्रदायस्वरूपं या च तत्र हेतुहेतुमद्भावापन्ना शृङ्खला तद्बोधनाय विचार इदानीमावश्यकः । साकारब्रह्मवादावान्तरविचाररूपश्चाऽयं भविष्यति । तत्प्रमेयबलप्रमाणबलयोः स्वरूपतत्सम्बन्धनिर्धाराय

श्रीमदाचार्य्यचरणसिद्धान्तसरणिसुधां किञ्चित्प्रपञ्चेन पुरः परिवेष्यमाणामास्वादयन्तु सुधियः सज्जनाः । संरक्षन्तु च श्रीमदाचार्य्यचरणश्रीमत्प्रभुचरणानामाज्ञानुसारेण सन्मार्गमित्याशास्महे ।

तथाहि । श्रीमदाचार्य्यचरणैस्तावत्प्रमाणानुरुद्धः प्रमेयमार्गः प्रकटीकृतः । "वेदाः श्रीकृष्णवाक्यानी" ति प्रमाणाङ्गीकारेण तद्व्याख्यानादिना च पुष्टिमार्गस्य स्थापनं कृतम् । पुष्टिश्च भगवदनुग्रहः । स च स्वतन्त्रो न पराधीनः । भगवत्सम्बन्धी यतोऽयमनुग्रहः । देवान्तरसम्बन्धित्वे तेषामनीश्वरत्वादिना तान् प्रमाणोक्तपूजादिसाधनैः सन्तोष्य तदनुग्रहः शक्यः साधयितुम् । भगवतस्तु—"ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणे" त्यादिना निरवध्यैश्वर्य्यादिप्रतिपादनमस्ति । तस्याऽनुग्रहः स्वैश्वर्य्यादिना उपलक्षणविधया स्वकीयैः साधनान्तरैश्च साधयितुं सर्वथाऽप्यशक्य एव । उक्तश्च "नमो भगवते तस्मा" इति निबन्धाद्यपद्यव्याख्याने साधननिष्कर्षमुपनिबध्नद्भिः श्रीमदाचार्य्यचरणैः—"भगवति जीवैर्नमनमेव कर्त्तव्यम् । नाधिकं शक्यमिति सिद्धान्तः । 'किमासनं ते गरुडासनाय किं भूषणं कौस्तुभभूषणाय । लक्ष्मीकलत्राय किमस्ति देयं वागीश किन्ते वचनीयमस्ती' त्यादिवाक्यैरि" ति । तस्मात्प्रमाणादिभिरपराधीनः किन्तर्हि स्वाधीनो भगवदनुग्रहः । स्वयमेव स्वं साधयेत्तादृशः । न साधनान्तरसाध्य इति यावत् । स च स्वैकसाध्यफलं प्रति साधनमिति मार्गः । पुष्टिश्चाऽसौ मार्गश्च पुष्टिमार्गः । यश्चाऽयं पुष्टिमार्गः स एव प्रमेयमार्गः । "प्रमाणे बुद्ध्या फलम् । प्रमेये तु वस्तुनः शक्त्या फलमि" ति प्रथमस्य नवमे "त्रिभुवनकमनं तमालवर्णमि"

त्यस्य श्रीमत्सुबोधिन्यां स्थितम् । पुष्टिश्च वस्तुनो भगवतः शक्तिः । तया च फलमिति पुष्टिमार्गस्य प्रमेयमार्गता ।

तस्य प्रमाणानुरुद्धता च न प्रमाणमार्गता । "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामि" ति प्रमाणमार्गस्य भगवत्प्रापकत्वनिषेधपूर्वकं वरणात्मकवस्तुशक्त्या भगवल्लाभात्मकफलसिद्धिश्रावणेन प्रमेयमार्गे प्रमाणमार्गताया अत्यन्तविरुद्धतया प्रमाणमार्गत्वशङ्काया एवाऽनुदय इति ।

किन्तु प्रमाणेन तादृशप्रमेयमार्गस्याऽनुपपादने प्रमाणं विना केवलं कपोलजल्पनयैव प्रमेयमार्गस्य साधने अप्रामाणिकत्वात् पाषण्डत्वशङ्का स्यात् । तन्मार्गवक्तुरनाप्तत्वञ्च प्रसज्येत । प्रमाणेनाऽनुपपादने वक्तुस्तादृशज्ञानलाभे कः प्रकारो येन विवक्षितमार्गसिद्धिरिति । तथा सति प्रेक्षावत्प्रवृत्तिप्रतिबन्धेन प्रमेयमार्गप्रवृत्तिर्दुर्घटैव । तेन मार्गप्रवृत्तिसौकर्य्यार्थमप्रामाणिकत्वपाषण्डत्वशङ्काव्युदासपूर्वकमेव प्रमेयमार्गः स्थापनीयः ।

किञ्च । बोध्यत्वान्मार्गस्य प्रमाणानाञ्च बुद्ध्यनुग्राहकत्वात्सौकर्य्यं द्वितीयम् । " मानाधीना मेयसिद्धिरि " ति सिद्धान्तात् ।

अपरञ्च—प्रपञ्चे हि प्रमेयमार्गस्य प्रवर्त्तयिष्यमाणतया प्रपञ्चस्य च "प्रकृतैतावत्त्वं हि प्रतिषेधती" ति परिच्छिन्नताबोधनात् "एतावानस्य महिमे" त्यादिना च परिच्छिन्नताश्रवणान्मर्यादापन्नत्वम् । "वाक्तन्त्यां दामभिर्बद्धा वहन्ति बलिमीशितुरि " त्युक्त्या च तत्तन्नियमानतिक्रमरूपमर्यादानुपथत्वमिति "परप्रसिद्ध्या परो बोधनीय" इति न्यायेन नियतं प्रमाणेनैव बोधनीयतया तद्बुद्धिसौकर्य्यद्वारा मार्गप्रचारे सौकर्य्यं तृतीयम् । प्रमाणानतिक्रमो हि मर्य्यादैवेति ।

अपि च । "निरोधोऽस्याऽनुशयनमात्मनः सह शक्तिभिरि"ति निरोधपदार्थविवेचने भक्तानामुद्धारार्थमानुकूल्येन या भगवतः स्थितिस्तदनुशयनं स एव च निरोधपदार्थ इत्याकरेषु स्थितम् । आनुकूल्येन च स्थितिः "प्रपञ्चे क्रीडनं हरेः" । प्रपञ्चे क्रीडनञ्च प्रापञ्चिकैर्धर्मैरस्पृष्टमपि प्रसादातिशयेन भक्तोद्धारार्थं लीलया प्रपञ्चाधिकरणकत्वात्तद्धर्मविशिष्टमेव । तेन च मर्यादापन्नमेव । तत एव " ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिता " इति परिच्छिन्नत्वबोधकानि वाक्यानि । "एकादश समास्तत्रे" त्यादीनि च । तथा च निरोधेन भक्तोद्धाराय यथा मर्यादाङ्गीकारस्तथैवेदानीमपितन्मार्गस्यैव प्रकटीकरणं "सर्वोद्धारप्रयत्नात्मा कृष्णः प्रादुर्बभूव हे" त्यादिना "कलिकाले" त्यादिना "दयया निजमाहात्म्यमि" त्यन्तेन "तस्यै वाऽऽनुभावप्रकटनहृदयस्याऽऽज्ञये" त्यादिना च सन्दर्भेण सिद्धमिति तत्र च कृतनिर्वचननिरोधलीलाविशिष्टप्रभुतिरोभावे तदुद्धारकतया श्रीभागवतरूपेण भगवत्स्थितिः सिद्धेति श्रीभागवतञ्च वेदादिसर्वसन्देहनिरासद्वारा वेदादीनां पुष्टितात्पर्य्यकत्वस्थापकमिति श्रीकृष्णप्रादुर्भावः श्रीमद्भागवतार्कोदयः श्रीमदाचार्य्यचरणप्रादुर्भावस्तैस्तत्तद्ग्रन्थकरणं तेन च वेदादीनां पुष्टिपरत्वमिति सर्वेयं श्रीकृष्णस्याऽनुशयनरूपा निरोधलीलैवेति तस्याः प्रपञ्चाधिकरणकतायां प्रमेयमार्गस्य प्रमाणानुरुद्धता परमौचित्यायेति । परमानुग्रहरूपा च । भक्तानामुद्धारार्थं भगवत आनुकूल्येन प्रपञ्चास्थितेः परमानुग्रहरूपत्वात् । तेनाऽप्रामाणिकत्वपाषण्डत्वादिशङ्काव्युदासोऽपि परमानुग्रहेणैवेति गङ्गाप्रवाहान्तःपातिबाह्योदकस्येव प्रमाणाङ्गीकारस्याऽपि पुष्टिरूपत्वमेव । अनुग्रहप्रवाहपातित्वात् ।

एवमप्रामाणिकत्वपाषण्डत्वादिशङ्कानुदयद्वारा प्रेक्षावत्प्रवृत्त्या-

नुकूल्याय तत्तत्सौकर्य्यौचित्याद्यर्थश्च प्रमेयमार्गेऽपि प्रमाणाङ्गीकारः सुतरामेवाऽऽवश्यक इति स्थितम्।

तथा सति तत्र "नायमात्मा प्रवचनेने" त्यादिना सर्वसाधननिषेधपूर्वकं वरणैकलभ्यत्वं श्राव्यते। "भक्त्याऽहमेकया ग्राह्य" इत्यादिना भक्तिप्राप्यत्वमप्युच्यते। भक्तिपदशक्तिश्च "स्नेहो भक्तिरिति प्रोक्त" इत्येनेन स्नेहे निर्धारिता। तत्साधनता च नवविधभक्तेः "भक्त्या सञ्जातया भक्त्ये" त्यादिना सिद्धा। नवविधायाश्च "जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः। नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते" "दानव्रततपोहोमजपस्वाध्यायसंयमैः। श्रेयोभिर्विविधैश्चाऽन्यैः कृष्णे भक्तिर्हि साध्यत" इत्यादिना पापाभावस्य दानव्रतादीनाञ्च हेतुता बोध्यते। एवञ्च स्वतन्त्रानुग्रहैकलभ्यत्वतत्तत्साधनानुक्रमलभ्यत्वयोर्विरोधे तदुभयसामञ्जस्याय "उभयव्यपदेशादहिकुण्डलवदि" ति "प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः" इति सविशेषनिर्विशेषश्रुत्योर्व्यवस्थानवज्जीवकृतिसाध्यसाधनैरलभ्यं भगवदनुगृहीतत्वे तु साधनद्वारेणाऽपि लभ्यमिति सिद्धान्तव्यक्त्या "नाऽयमात्मे" ति साधनानि प्रतिषिध्याऽपि "नाऽयमात्मा बलहीनेन लभ्य" इत्यादिना बलादीनां पुनः साधनत्वोक्त्यापि केवलानुग्रहाधीनतत्तत्साधनानुक्रमसम्पल्लभ्यभक्तिलभ्यत्वमप्यङ्गीकार्य्यमेव।

तेन प्रमाणबोधिततया यथा प्रमेयमार्गस्य प्रमाणानुरुद्धता तथा प्रमाणोक्तसाधनसाध्यतयाऽपि। परं भगवदनुग्रहे सत्येव। न त्वन्यथाऽपि। भगवदनुग्रहश्च भगवदर्थित्वानुमेयः। तदर्थित्वस्यैव वरणकार्य्यत्वात्। वरणञ्चाऽनुग्रहादिति स्थितमेतद्भक्तिहंसे। एवञ्चाऽनुग्रहेण वरणे सति भगवदर्थित्वम्। भगवदर्थिनश्च भगवत्प्राप्तिरिदानीमनवतारकाले न रूपेण। नापि

मार्गनिरपेक्षेण प्रमेयबलमापन्नेन श्रीमदाचार्य्यचरणस्वरूपेण । सम्प्रति तेषामप्यनवतारकालोऽयमिति । किन्तु तत्प्रकटितमार्गेणेति तन्मार्गीयसाधननिष्ठोदयस्तस्य भवतीति। तदुक्तं श्रीमदाचार्य्यचरणैः । " यथा यथा हरिः कृष्णो मनस्याविशते निजे । तथा तथा साधनेषु परिनिष्ठा विवर्धत " इति । रागोत्कटत्वे नायिकाया नायकस्य वा दूत्याश्रयणवद्व्यसनोदये साधनाश्रयणस्याऽनिवार्य्यतया वरणकार्य्यस्य भगवदर्थित्वस्य फलपर्य्यवसायित्वनियमेन तीव्रतया च साधनाश्रयणमुचिततरम् ।

तथाच प्रमाणबोधिततया प्रमाणानुरुद्धता यथा तथा प्रमाणोक्तसाधनसाध्यतयाऽपि प्रमाणानुरुद्धता प्रमेयमार्गस्याऽनुग्रहव्यापाररूपैवेति " नायमात्मा प्रवचनेन लभ्य " इतीतरसाधनसाध्यतानिषेधपूर्वकं व्रतलभ्यत्वश्रुतिर्भक्तिलभ्यत्वोक्तिरनुग्रहस्य स्वैकसाध्यत्वस्थितिः प्रमेयस्य वस्तुशक्त्या सिद्धत्वव्यवस्थितिरप्रामाणिकत्वपाषण्डत्वानाप्तत्वादिशङ्काव्युदासो मार्गबोधतत्प्रचारसौकर्य्यौचित्यादि च सर्वं चतुरस्रम् ।

अनुग्रहाभावे तु केवलं प्रमाणोक्ततया प्राप्तानां साधनानां "जायस्व म्रियस्वे" त्यादिप्रवाहवत् " धनं मे जायताम् " "शत्रुर्मे व्यापद्यताम् " तथैव कदाचिद्यदृच्छयाऽत्यन्तदुःखानुभवेन वैराग्योदये " मोक्षो मे जायतामि " ति प्रवृत्तिप्रवाहस्य भगवदनभिमुखेष्वपि तेषु तेष्वास्तिकम्मन्येषु वैदिकम्मन्येषु वा बहुलं जागरूकतया प्रावाहिकत्वेन प्रावाहिकफलसाधकत्वमेव। तदपि न स्वातन्त्र्येण । किन्तर्हि भगवतश्चिक्रीडिषया—फलाध्यक्षेणेश्वरेणाऽनधिष्ठितमचेतनमदृष्टं न फलं साधयितुं समर्थमिति—मीमांसकं प्रत्यास्तिकोपदेशेन भगवत्कृतमेव । तास्थितं " फलमत उपपत्तेरि " त्यत्र । "येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयाऽन्विताः । तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् । अहं हि सर्वयज्ञानां

भोक्ता च प्रभुरेव च । न तु मामभिजानन्ति तत्त्वेनाऽतश्च्य-वन्ति ते " " कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः । तं तं नियममास्थाय प्रकृत्या नियताः स्वया । यो यो यां यां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति । तस्य तस्याऽचलां श्रद्धां तामेव विदधाम्यहम् । स तया श्रद्धया युक्तस्तस्याऽऽराध-नमीहते । लभते च ततः कामान् मयैव विहितान् हितान् । अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् " "अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते । इति मत्वा भजन्ते मां बुधा भावस-मन्विताः " इत्यादिषु चैतत्स्फुटम् ।

अयमेव तावत्प्रावाहिको मोक्षो निन्द्यते—" स्वर्गापवर्ग-नरकेष्वपि तुल्यार्थदर्शिन " इति " मधुद्विट्सेवानुरक्तमन-सामभवोऽपि फल्गुरि " ति " सालोक्यसार्ष्टिसामीप्यसारू-प्यैकत्वमप्युत । दीयमानं न गृह्णन्ति विना मत्सेवनं जना " इति च ।

अत्रैतदवधेयम् । भगवदर्थित्वं नाऽधिकारितावच्छेदकमपि त्वनुगृहीतत्वलिङ्गमिति न भगवदर्थितया कृतानामेव प्रमाणो-क्तानां साधनानामनुग्रहव्यापारत्वं किन्तर्हि केवलप्रमाणो-क्ततया कृतानामपि साधनानां सत्यां भगवतः स्वरूपफल-दित्सायामिति प्रावाहिकस्याऽपि प्रमाणमार्गस्य प्रमेयमार्गे उपयोगात्तदनुरुद्धताऽपि विरोधाभावादाद्रियते । प्रवाह-स्याऽपि प्रमेयौपयिकता तु " संसारचक्रे भ्रमतः स्वकर्मभिरि " त्यत्र वृत्रासुरचतुःश्लोकीटीकायां श्रीमदाचार्य्यचरणप्रकटी-कृतायां सिद्धा । श्रीयमुनाष्टके श्रीमत्प्रभुचरणप्रणीततद्विवृति-कृतनिर्वचनसकलसिद्धिहेतावपि " इयं तव कथाऽधिका सकलगोपिकासङ्गमस्मरश्रमजलाणुभिः सकलगात्रजैः सङ्गम " इति प्रतिपादितप्रमेयबलायामपि श्रीकालिन्द्यां " न जातु यम-

यातना भवति ते पयःपानत" इत्यादिप्रावाहिकफलदातृत्व-प्रतिपादनमपि माहात्म्यबोधनद्वारा प्रमेयोपयोगि जीवस्याऽभि-मुखीकरणार्थञ्चाऽनुग्रहातिशयादेवेति । प्रावाहिकफललोभेन प्रवृत्तस्य तत्फलप्राप्त्या माहात्म्यबोधे जाते तेन च भगवत्स-म्बन्धे सति "न वस्तुशक्तिर्बुद्धिमपेक्षत" इति न्यायेन प्रमेयेण फलं न प्रवाहेणेत्यभिमुखीकरण उपक्षीणः प्रावाहिकः प्रमाण-मार्ग इति तदनुरुद्धताऽपि साधीयस्येव । अनुग्रहस्य नियाम-कान्तराभावेन स्वतन्त्रत्वात्सर्वोपयोगानुपयोगौ तदन्वयव्यति-रेकाभ्यामिति निगर्वः ।

किञ्च । "भवेऽस्मिन् क्लिश्यमानानामविद्याकामकर्मभिः । श्रवणस्मरणार्हाणि करिष्यन्निति केचन" "तथा परमहं-सानां मुनीनाममलात्मनाम् । भक्तियोगविधानार्थं कथं पश्येम हि स्त्रियः" "आच्छिद्य कीर्त्तिं सुश्लोक्यां वितत्य ह्यञ्जसा नु कौ । तमोऽनया तरिष्यन्तीत्यगात्स्वं पदमीश्वर" इत्यादौ प्रावाहिकाणामुद्धारार्थं भगवत्प्रादुर्भाव उच्यते । मुनीनां प्रावाहिकत्वञ्च "देवानां शुद्धसत्त्वानामृषीणा-ञ्चाऽमलात्मनाम् । भक्तिर्मुकुन्दचरणे न प्रायेणोपजायत" इत्यत्र वृत्रप्रसङ्गे स्फुटं प्रादर्शि । स्थितञ्चैतत् "सर्वोद्धारप्र-यत्नात्मा कृष्णः प्रादुर्बभूव हे" त्यत्र "यस्याऽऽसीद्रूपमेव त्रिभुवनतरणे भक्तिवच्च स्वतन्त्र" मित्याद्यश्लोके श्रीमत्सु-बोधिन्यामेवमन्यत्राऽपि तत्र तत्र श्रीमदाचार्य्यचरणप्रबन्धेषु । तथाच "कलिं सभाजयन्त्यार्याः सारज्ञाः सारभागिनः । कुशलान्याशु सिध्यन्ति नेतराणि कृतानि यदि" त्यादिवत् प्रवाहस्याऽपि प्रकृतोपयोगितया प्रशस्यत्वमन्यथा तु कले-र्निन्दावदतितरां हेयत्वमिति स्पष्टम् ।

अपि च । पुष्टिमार्गो ह्यनुग्रहमार्गः । तदुत्कर्षश्च तत्साध्य-

फलस्य साधनान्तरसाध्यफलापेक्षयोत्कर्षसाधनमात्रेण न सिध्यति । किन्तु तदधिकारस्य सर्वदेशदिशाकालेषु सार्वजनीनत्वेन सौलभ्ये, तत्साधनानाञ्च सौलभ्यसुकरत्वानिरपायत्वादिस्वरूपतायां, प्रज्ञापराधेन साधनवैगुण्यादावपि फलांशे व्यभिचारानुदय एव सिध्यति । तदैव तस्य पुष्टित्वम् । यदि परमोत्कर्षेऽपि फलस्य न स्वाधिकारस्वकृतिसाध्यता ? अलं तेनोत्कर्षेण । स्वानुपयोगात् । तेन केवलायामनुग्रहाधीनतायां तदनुग्रहाधीनसाधनसाध्यत्वसर्वाधिकारकत्वाभावे तु स्वानुपयोगप्रसङ्गात्पुष्टित्वमेव न सिध्यतीति तदनुग्रहलब्धसाधनबलेन भगवत्प्राप्तिरूपफलसिद्धिः परमानुग्रहमेव पुष्णाति । न तु साधनान्तरस्पर्शेन भगवदनुग्रहे तत्फले वा न्यूनतां प्रसञ्जयतीति सुतरामनुसन्धेयमेतद्विवेकिभिः । एवं स्थिते प्रावाहिकाणामपि "स्वबलेन स्वप्रापणं पुष्टिरि" ति पुष्टिलक्षणाद्भगवत्प्राप्तिरूपः परम उद्धारस्तदुद्धारे च यथातथं प्रवाहोपयोगश्च पुष्टेः कालादिबाधकत्वरूपपरमोत्कर्षनैरवध्यादिसाधक एव । न तु पुष्टेरपकर्षं प्रयोजयतीति व्यक्तम् । न खल्वेतावतैव पुष्टिशास्त्रं परिसमाप्तुमर्हति यदुत्तमानामेव समुद्धरणम् । किन्तु मन्दमध्यमावप्यनुगृह्य । तदनुग्रहश्च तदभीप्सितसम्पादनेन माहात्म्यबोधनद्वारा स्वाभिमुखीकृत्य केवलानुग्रहसाध्यफलस्य तेभ्यो दानम् । तथा ह्याहुः श्रीमदाचार्य्यचरणाः—" यस्य प्रसादाद्वागीशाः प्रजेशा विभवोन्नताः । क्षुद्रा अपि भवन्त्याशु श्रीकृष्णं तं नतोऽस्म्यहम् ।" श्रीकृष्णेति मुख्यफलात्मकं नामेति प्रजेशत्वादिसम्पादनपूर्वकं तादृशफलदानमपि । " राज्यान्ते नरकं ध्रुवमि " त्यादिना प्रजेशत्वादेः फलप्रतिबन्धकतायामपि तत्प्रतिबन्धकत्वं प्रत्युत प्रतिबध्य साधकत्वमेवाऽद्भुतकर्मत्वात्सम्पाद्य यन्मुख्यफलप्रापणं तदीश्वरत्वा-

दुपपन्नम् । तदिदं प्रथमस्य दशमे "वंशाङ्कुरं वंशदवाग्निनिर्हतं संरोहयित्वा भवभावनो हरिः । निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह" त्यत्रेश्वरपदव्याख्याने—"स्वयमीश्वरोऽन्यानपीश्वरान् कृत्वा सुखी भवति । अथवा ईश्वरः समर्थः । असमर्थो हि प्रमाणमुखनिरीक्षकः सर्वं त्याजयित्वा मुक्तिं प्रयच्छति । अयन्तु न तथेत्यर्थ" इत्यनया श्रीमत्सुबोधिन्या स्फुटम् ।

युक्तश्चैतत् । यदाहुः श्रीमत्प्रभुचरणाः—"दयालोरसमर्थस्य दुःखायैव दयालुते" ति । "कियान् पूर्वं जीवस्तदुचितकृतिश्चापि कियती भवान् यत्सापेक्षो निजचरणदाने बत भवेत् । अतः स्वात्मानं स्वं निरुपममहत्त्वं व्रजपते समीक्ष्याऽस्मन्नेत्रे शिशिरय निजास्याम्बुजरसैरि" ति च ।

तदेवं प्रमेयमार्गस्य प्रमाणानुरुद्धता न प्रमाणमार्गता । प्रमाणबलेन भगवत्प्राप्तिनिरूपणाभावात् । वरणश्रुत्या प्रमाणबलेन तत्प्राप्तेर्निराकृतत्वाच्च । किन्तु भगवदर्थितया तत्प्राप्तिमुख्योपायभूतस्नेहलाभसाधनेषु प्रमाणोक्तेषु ज्ञानकर्मादिषु प्रमेयबलेन प्रवृत्तिरूपा । विधेः प्रवर्त्तकत्वं निवर्त्तकत्वञ्च नाऽस्ति । "पुण्यं कुरु" "पापं मा कार्षीरि" ति विधिश्रवणेनाऽधिकारिमात्रस्य पापनिवृत्तिपुण्यप्रवृत्त्योरदर्शनात् । किन्तु भगवत एव वस्तुतः प्रवर्त्तकत्वनिवर्त्तकत्वे । तथा च श्राव्यते—"यमेष उन्निनीषति तं साधु कर्म कारयति । यमधो निनीषति तमसाधु कर्म कारयती" ति । "प्रवर्त्तकत्वं कृष्णस्य न विध्यर्थस्य कर्हिचिदि" त्यादौ निबन्धे तत्प्रकाशे तदावरणभङ्गे च विशदमेतदुपपादितम् । एवं सति यत्र मर्य्यादायामपि न मुख्यं प्रमाणबलम् । फलमुखप्रवृत्त्यप्रवृत्तिसामर्थ्याभावात् । किन्तु प्रमेयस्य भगवतो बलेनैव फलमुखप्रवृत्त्यप्रवृत्ती भवतः । परं तत्प्रमे-

यद्बलं प्रमाणानुग्राहकमिति प्रमाणबलं प्रमाणमार्ग इति व्यवहारः। तदा यथोक्तप्रमाणप्राप्तस्वाभाविकागन्तुकात्रिविधसाधननिषेधपूर्वकं वृतलभ्यत्वश्रुत्या तादृशप्रमाणास्पृष्टे पुष्टिमार्गे वरणस्याऽनुग्रहजन्यत्वे, तद्व्यापाररूपतायां वरणप्रकारविशेषरूपतायाश्च भगवत्प्राप्त्युपायभूतस्नेहोदयसाधनेषु प्रवृत्तेः, अनुग्रहाधीनप्रवृत्तिकेषु ज्ञानकर्मादिषु प्रमाणोक्तेषु प्रमाणोक्तफलदत्वेन प्रमाणानुग्राहकं प्रमाणबलं नाऽस्तीति, किन्तु प्रमेयसाध्यफलदत्वेन प्रमेयानुग्राहकं प्रमेयबलमेव केवलमस्तीति सर्वथाऽप्यवक्तव्यमेव । प्रस्फुटत्वात् ।

एवमेव भगवदर्थितया तत्प्राप्तिमुख्योपायसाधनेष्वप्रवृत्तौ "पुत्रो मे जायतामि" त्यादिप्रावाहिकफलार्थितया प्रावाहिकसाधनेषु प्रवृत्तावपि भगवतोऽनुग्रहवशेन स्वरूपात्मकफलदित्सायां माहात्म्यबोधनद्वारा भगवदर्थित्वरूपभगवदाभिमुख्यसम्पादनेन प्रावाहिकसाधनानां प्रमेयसाध्यफलसाधकतया प्रमेयानुग्राहकेण प्रमेयबलेनैवोपयोगो न प्रमाणबलेनेति भगवदर्थितया तल्लाभसाधनेषु प्रवृत्तिसम्पादनरूपा वा भगवत्परत्वसम्पादनरूपा वा प्रमेयमार्गे प्रमाणानुरुद्धता । न तु प्रमाणमार्गता । प्रमाणबलेन फलस्याऽसाध्यत्वादित्यवोचाम ।

प्रामाणिकत्वसम्पादनाय प्रमाणोपपन्नता चैका प्रमेयमार्गस्य प्रमाणानुरुद्धता । सापि प्रमेयबलरूपेत्युक्तं प्राक् ।

तथाच स्वतन्त्रेण साधनासाध्येन प्रमेयबलरूपेण भगवदनुग्रहेण परम्परया प्रमाणोक्तसाधनसाध्यत्वतत्तात्पर्य्यगोचरत्वादिरूपा प्रमेयमार्गस्य प्रमाणानुरुद्धताऽविरुद्धैवेति सिद्धं श्रीमदाचार्य्यचरणैः प्रमाणानुरुद्धः प्रमेयमार्गः प्रकटीकृत इति ।

एतत्सर्वं "नाऽयमात्मा प्रवचनेन लभ्य" इत्यादिश्रुतेरेव प्रपञ्चः । प्रवचनादिसाधननिषेधपूर्वकं वृतलभ्यत्वोक्त्या "यमे-

वैष वृणुत" इति यमिति साधनेषु प्रवृत्ताप्रवृत्तसाधारण्येन वरणोक्त्या तेन च जीवकृतसाधनप्रवृत्त्यप्रवृत्त्योरनुग्रहेऽनावश्यकत्वोक्त्या बाधकत्वानुक्त्या प्रत्युत स्वबलेन तयोः सहकारित्वसम्पादने "अधिकं तत्राऽनुप्रविष्टं न तु तद्धानिरि" ति न्यायात्साधनत्वोक्तिनिर्गलनेन च सर्वमपीदं संसिद्ध्यतीति ।

वेदोक्तत्वादिनाऽपि यदि प्रमेयमार्गस्य प्रमाणमार्गत्वापातः । तेन च "नाऽयमात्मा प्रवचनेन लभ्य" इति निषेधस्य वेदतात्पर्य्यगोचरत्वमात्रेऽपि प्रसर इति वेदोक्तत्वादिना प्रामाणिकत्वादिसाधनं पुष्टिराद्धान्तविरुद्धमिति तूपजीव्यवरणश्रुतितात्पर्य्यगोचरत्वादिना विरोधान्न वक्तुं शक्यम् ।

अनुग्रहात्सहकारित्वं प्रमाणस्य तत्तात्पर्य्यगोचरत्वांशेऽपि । अननुगृहीतस्य तथा प्रमाणतात्पर्य्यमेव न स्फुरतीति ज्ञापनांशेऽनुष्ठेयांशे च सहकारित्वानुदयात् । "न ह्यन्यो वागधीशाच्छ्रुतिगणवचसां भावमाज्ञातुमीष्टे यस्मात्साध्वी स्वभावं प्रकटयति वधूरग्रतः पत्युरेव । तस्माच्छ्रीवल्लभाख्य त्वदुदितवचनादन्यथा रूपयन्ति भ्रान्ता ये ते निसर्गत्रिदशरिपुतया केवलान्धन्तमोगा" इत्यत्रैतत्स्फुटम् । "वेदपारग" इत्यत्र च ।

किञ्च । स्वानुभावप्रकटनहृदयेन साक्षाद्भगवता श्रीमदाचार्य्यचरणाः श्रीमद्भागवतगूढार्थप्रकाशनाय स्वयमाज्ञप्ता इति भगवतः प्रमाणानुरुद्धः प्रमेयमार्ग एव प्रचिकटयिषितः । स एव च तयाऽऽज्ञया भूमावाविर्भूय सन्मनुष्याकृतिभिरतिकरुणैः श्रीमदाचार्य्यचरणैः प्रकटित इति "अर्थं तस्य विवेचितुं नहि विभुर्वैश्वानराद्वाक्पतेरन्यस्तत्र विधाय मानुषतनुं मां व्यासवच्छ्रीपतिः । दत्वाऽऽज्ञाञ्च कृपावलोकनपटुर्यस्मादतोऽहं मुदा गूढार्थं प्रकटीकरोमि सततं व्यासस्य

विष्णोः प्रियमि" त्यादावेतत्स्थितम् । तेन साक्षाच्छ्रीकृष्णेन तदाज्ञया श्रीमदाचार्य्यचरणैश्च केवलया करुणयैव प्रमाणस्य सहकारित्वं सम्पादितं स्वीकृतञ्चेति प्रस्फुटमिदम् ।

"नाऽयमात्मा प्रवचनेने" त्यादौ च प्रमाणस्य फलप्रापणे स्वातन्त्र्यमेव प्रतिषिध्यते । न तु प्रमेयबलेन प्रमाणे सहकारित्वोदयोऽपीति तत्तदुपबृंहणबलादध्यवसीयते ।

अपरञ्च । "इन्द्रियाणां प्रमाणत्वं सत्त्वयोगान्न चाऽन्यथे" त्यत्र प्रकाशे—"सत्त्वसहिता बुद्धिः प्रमाणम् । सत्त्वप्रवृद्धावन्तःकरणं प्रमितिं जनयति । सत्त्वात्सञ्जायते ज्ञानमिति । अन्यथा सत्त्वलये सैव सामग्री भ्रमं जनयति । अतोऽन्वयव्यतिरेकाभ्यां सत्त्वमेव प्रमाणमि" त्युक्तं श्रीमदाचार्य्यचरणैः ।

तथेहाऽपि भगवत्तदनुग्रहान्यतरयोगादेव प्रवचनादिप्रमाणं भगवत्स्वरूप-तल्लाभ—तत्साक्षात्साधनस्नेह—तत्साधननवविध-भक्ति–तत्साधनदानादिसर्वसाधनानां प्रमितिं जनयति । न त्वन्यथाऽपि । तथा सति नानाफलतत्साधनभ्रममेव जनयति । न प्रमां यथार्थामिति नैतद्विवार्य्य वक्तव्यं बुद्धिमत्सु ।

एवं सति प्रमेयमार्गस्य या प्रमाणानुरुद्धता सा न प्रमाणानुरोधिता । प्रमेयस्य स्वातन्त्र्यात्प्रमाणमनुरोद्धुं शीलं नाऽस्तीति । किन्तु प्रमाणेन प्रवचनादिना अनु आनुकूल्येन तज्जन्यत्वे सति तज्जन्यजनकत्वरूपेण सहकारित्वादिना वा भगवत्तदनुग्रहान्यतरसम्बन्धावच्छिन्नप्रमाणताकत्वरूपेण वा अप्रामाणिकत्वपाषण्डत्वादिनिरासाय मार्गबोधतत्प्रचारसौकर्य्याय तत्तदौचित्याय च रुद्धता आवृतता आभिव्याप्तता । संरक्षिततेति यावत् । सर्वत्राऽप्यंशे प्रमाणप्रदर्शनात् ।

एवञ्चाऽन्वयव्यतिरेकाभ्यां सत्त्वस्यैव प्रमाणत्ववत् भगवत्तदनुग्रहयोरेव प्रमाणतेति प्रमाणानुरुद्धता भगवत्तदनुग्रहान्यतर-

रुद्धतैव। सा च "यमेवैष वृणुत" इति श्रुत्या तदुपबृंहणैश्च स्पष्टा।

तथाच उपपादितपरमावश्यकताकप्रामाणिकत्वापाषण्डित्व-तत्तत्सौकर्य्यौचित्यादिप्रयोजनाय प्रमाणोपपन्नतातत्तात्पर्य्य-गोचरत्वाभ्यां साक्षात्, उपपादितपरमावश्यकताकसौलभ्य-सौकर्य्यादिसिद्धये भगवत्प्राप्त्युद्देशेन प्रमाणोक्तसाधनानुष्ठान-साध्यतया स्वोक्तसाधनद्वारा, निरङ्कुशगतित्वमाहात्म्यादि-परमोत्कर्षसिद्धये तदनुद्देशेनाऽपि कृतैः प्रमाणोक्तसाधनैः प्रावाहिकफलदानद्वारा शास्त्रश्रद्धोदयक्रमेण स्वाभिमुखी-करणपूर्वकं स्वप्राप्तिसाधनेषु प्रवर्त्य स्वरूपात्मकफलदानेन परम्परया च प्राप्ता प्रमाणानुरुद्धता अनुग्रहमहामृताब्धेर-पर्य्यनुयोज्यलोलकल्लोलस्वैरमहाविलासरूपा। "यमेवैष वृणुत" इति प्रकारविशेषनियममनपेक्ष्य वरणलभ्यत्वोक्तेरेव विवर-णञ्च। अनुग्रहस्वरूपत्वञ्च विवक्षितायाः प्रमाणानुरुद्धताया उपपादितमिति श्रीमच्छुद्धपुष्टिमार्गाचार्य्यप्रवृत्त्यनुरूपं "वेदाः श्रीकृष्णवाक्यानी" ति प्रमाणाङ्गीकारपूर्वकं श्रीमदाचार्य्यचर-णानां पुष्टिमार्गस्थापनम्। तच्च प्रमाणसम्बन्धेन नाऽन्यरूपं किन्तु प्रमेयरूपमेव। तेन शुद्धपुष्टिमार्गाचार्य्यत्वं न विहन्यते। प्रत्युतोपचीयत एवेत्याभिव्यक्तम्। प्रमेयमार्गस्य प्रमाणानु-रुद्धतेति तु मर्मज्ञं प्रति प्रमेयप्रकारनिर्देशस्तदितरं प्रति च "न बुद्धिभेदं जनयेदि" त्यादिवद्बालोपच्छन्दनम्।

अत्रैतदवबोध्यम्। प्रमाणं मर्यादा। प्रमेयं पुष्टिः। प्रमेयस्य प्रमाणानुरुद्धता च प्रमेयमर्यादा। तदन्या तु प्रवाहमर्यादा। सा च "एतावान् साङ्ख्ययोगाभ्यां स्वधर्मपरिनिष्ठया। जन्म-लाभः परः पुंसामन्ते नारायणस्मृतिरि" त्यत्राऽन्यत्रापि च श्रीमत्सुबोधिन्यादौ व्युत्पादिता। इहाऽपि प्रागुपदर्शिता व्यव-स्थापिताऽपि।

प्रमेयमर्यादा तु या सा द्वेधा । धर्मद्वारा धर्मिपरा एका। साक्षाद्धर्मिपरा द्वितीया । "तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वरः। श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यश्चेच्छताऽभयम्" "किमेकं दैवतं लोके किं वाऽप्येकं परायणम् । स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् । को धर्मः सर्वधर्माणां भवतः परमो मतः । किं जपन् मुच्यते जन्तुर्जन्मसंसारबन्धनात्" "माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः । स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्नचाऽन्यथा" "चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन । आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभे" त्यादिषु मोक्षदातृत्वादिधर्मपुरस्कारेण धर्मिपरतायाः स्पष्टमुपपादनात् ।

धर्मिपरता च प्रमाणमार्गस्य फलत्वेन विधेयत्वेनोद्देश्यत्वेन च भगवति सम्बन्धाभावेन विभूतिपर्य्यवसायित्वं भक्तिहंसे स्थितमिति न प्रमाणबलेन । किन्तु "यमेवैष वृणुत" इति श्रवणाद्वरणलभ्यैव। तेन धर्मद्वारा धर्मिपराणां श्रीपुरहरनारद व्यासशुकादीनां भीष्मकुन्तीद्रौपद्यादीनाञ्च स्वबलेन स्वप्रापणमस्तीति पुष्टिमार्गीयत्वं स्पष्टम् । प्रमाणादिनिष्ठता च तेषामनुग्रहरूपैवेत्यवोचि ।

तथापि तेषां यो भगवल्लाभः स तावत् "प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः। आहूत इव मे शीघ्रं दर्शनं याति चेतसी" त्यत्र "तीर्थानि सन्तः पादे यस्य । सर्वे हि सन्तः सायुज्यं प्राप्ता भगवत्पादे वर्त्तन्ते । अन्येऽपि भक्तिवशात्। तादृशो हि भक्तिगुण" इत्यादिना प्रथमस्य षष्ठे श्रीमत्सुबोधिन्यां बोधितः । तथैव प्रथमस्य नवमे "त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने । वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्ये" त्यत्र "अलककुलावृताननाब्जं

५

ब्जामि” त्येतत्पदव्याख्याने “अलमत्यर्थं कं येषां ते ब्रह्मविदः । तेषां कुलैर्वा । त एव वा ते” इत्यनया श्रीमत्सुबोधिन्या ब्रह्म-विदामलकादिरूपेण भगवद्वपुषि सायुज्यं भगवल्लाभ इत्युक्तम्। ब्रह्मविदाप्नोति परामि” त्यत्राऽपि सायुज्यमेव ब्रह्मविदां न्यरूपि । तच्च नैक्यम् । “सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते” त्युक्तयजुर्व्याख्यानर्चि ब्रह्मणा सह सर्वकामभो-गस्य परप्राप्तिपदार्थत्वेन विवृतत्वात् । किन्तु सह युनक्तीति सयुक् । तस्य भावः सायुज्यमिति भेदसहोऽभेद एव सायुज्यम्। तदेव “तीर्थपाद” इत्यत्र “अलककुले” त्यत्र च बोधितम् । तदिदं सेवाफलविवरणटीकासु श्रीदेवकीनन्दनश्रीहरिरायादि-प्रणीतासु मध्यमफलसायुज्यपदार्थविवेचने स्फुटम् । “भजनं सर्वरूपेषु फलसिद्ध्यै तथापि तु । आदिमूर्त्तिः कृष्ण एव सेव्यः सायुज्यकाम्यये” त्यत्र शास्त्रार्थनिबन्धकारिकायां तत्प्र-काशतदावरणभङ्गयोश्चैतद्विशदम् । “प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम् । आरब्धकर्मनिर्वाणो न्यपतत्पाञ्चभौ-तिकः” “अथो विभूतिं मम मायाविनस्तामष्टाङ्गमैश्वर्य्यमनुप्र-वृत्तम् । श्रियं भागवतीं वा स्पृहयन्ति भद्रां परस्य मे तेऽश्नुवते तु लोके” इत्यादौ यः सेवोपयोगी देहो निरूपितः स वा तेषां भगवल्लाभः ।

तेन श्रीपुरहरनारदव्यासशुकादीनां धर्मद्वारा धर्मिपराणां पुष्टिमार्गीयत्वेऽपि, प्रमाणादिनिष्ठतायाश्च तेषामनुग्रहरूप-त्वेऽपि, मोक्षदातृत्वादिधर्मपुरस्कारेणैव ते धर्मिपराः । न तु साक्षादिति मोक्षादावेव मुख्यस्तेषां फलत्वसम्प्रत्ययः । न तु साक्षात् स्वरूपे । तथापि धर्मिपरा इति स्नेहोदयोऽप्यस्ति तेषाम् । “आत्मा वा अरे द्रष्टव्य” इति धर्मिणो निरुपाधिप्रियत्व-श्रुत्या तत्स्वाभाव्यात्स्नेहोदयावश्यम्भावात् । तथा सति मोक्षे-

च्छानिवृत्त्या स्वरूपैकपरत्वाभिलाषोदयोऽपि भवति तेषाम् । एवमपि मोक्ष एव तेषां फलम् । "अनिच्छतो गतिमण्वीं प्रयुङ्क्त" इति वाक्यात् । स च साधनावस्थायां धर्मद्वारा धर्मिपरतया मध्ये च स्नेहोदयात्तद्बलेन नाऽन्यरूपः । किन्तु भगवत्स्वरूपानन्दतुन्दिलः सायुज्यरूपः । वैकुण्ठादिषु सेवोपयोगिदेहलाभरूपो वा । न तु मुख्यः स्वरूपानन्दानुभवस्तेषाम् । "अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम् । हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरमि" त्यादिभिर्मधुराष्टकनिर्वर्णितस्वरूपः । स तु मुख्यभजनाधिकारिणां शुद्धपुष्टिमार्गीयाणामेव । नान्येषामिति परस्तात्प्रतिपादयिष्यते । एवञ्च तेषां मुख्यं फलं नास्ति । किन्तु मध्यममन्तिमञ्च साधारणं सेवाफलोक्तम् । ततश्च तेष्वनुग्रहोऽपि न मुख्यः । किन्तु फलानुरूपो मध्यमः साधारणश्चाऽपि । फलतारतम्यतुलिततारतम्य इति यावत् । फलतारतम्यन्तु पुष्टिमर्यादाप्रवाहभेदैस्त्रिधाऽङ्गीकारेण पुष्टेस्त्रैविध्यात् । पुष्टावङ्गीकारः पुष्टिपुष्टिः । सैव च वक्ष्यमाणया साक्षाद्धर्मिपरया मर्यादया लब्धा शुद्धपुष्टिः केवलपुष्टिरित्युच्यते । मर्यादायां या पुष्टिस्तस्याः साधनमिश्रत्वात् । तत्फलरूपा तु मर्यादांशत्यागपूर्विकेति तस्याः शुद्धत्वात् । तत्र तावन्मुख्यं फलम् । मर्यादायामङ्गीकारो मर्यादापुष्टिः पुष्टिमर्यादा वा । सैव प्रमेयमर्यादा । तत्र धर्मद्वारा धर्मिपरायां तस्यां मध्यमं सायुज्यं फलम् । प्रमेयमर्यादा चेयमुक्तरीत्या केवलानुग्रहरसाऽपि धर्मद्वारा धर्मिपरत्वेन धर्मोन्मुखी । न धर्म्युन्मुखी । तथाच यथैतस्याः साधनतो मर्य्यादापर्य्यवसानमेवं धर्मप्राधान्येन पर्यवसन्नतया, मध्यमतया, प्रमाणोक्तसाधनसाध्यतया च तत्फलस्य, फलतोऽपि मर्यादापर्य्यवसन्नत्वम् । शुद्धपुष्टिप्रविष्टभोग्यफलापेक्षया तत्फलस्यै-

कान्ततोऽत्यल्पतया च मर्य्यादापन्नत्वम् । ततश्च शुद्धपुष्टिमार्गीयाणां तदनपेक्षा तत्र पुष्टित्वास्फूर्त्तिश्च । तथा सति "प्राधान्येन व्यपदेशा भवन्ती" ति न्यायेन, प्रमेयमर्यादेयं सिद्धान्तगत्या पुष्टिरूपाऽपि, पुष्टेः प्राधान्याभावेन, मर्यादांशस्यैव च स्फुरद्रूपतया, मर्यादाशब्देनैव केवलेन, तत्र तत्र शुद्धपुष्टिपक्षपातस्थलेषु, मार्मिकैर्व्यवह्रियते । सिद्धान्तपरिचयकाले तु मर्यादापुष्ट्यादिशब्देनाऽपीति ज्ञेयमेतत् । प्रवाहेऽङ्गीकारः प्रवाहपुष्टिः । तत्र च तृतीयं साधारणं फलमित्यन्यत्र विस्तरः । तस्माद्धर्मद्वारा धर्मिपरा मर्यादा यद्यपि पुष्टिमयी । तथापि सा पुष्टिर्मर्यादाङ्गीकारहेतुभूताऽन्यशेषतयोपक्षीणा । तत्र तस्याः पुष्टिपदव्यपदेश्यतां प्रयोजयितुं सामर्थ्यं नास्तीति मर्यादाशब्देनैव तद्व्यपदेशः । तदेवं प्रावाहिक्यामिव प्रामेयिक्यामपि धर्मद्वारा धर्मिपरायां मर्यादायां शुद्धपुष्टिमार्गीयाणां न पक्षपात इति स्थितम् ।

यद्यपि शुद्धपुष्टिस्थानामारादुपकारकत्वमस्यां न भवतीति मा स्म भवदत्र तत्पक्षपातः । विप्रकृष्टाऽपि साधनता त्वस्यास्तथापि तैर्व्यवस्थाप्यत इति तु पश्यत पश्यताऽनर्घं दीनानुग्रहं तत्रभवताम् । यदाहुः सिद्धान्तवाङ्मुक्ताफलावल्यां श्रीमदाचार्य्यचरणाः—"उभयोस्तु क्रमेणैव पूर्वोक्तैव फलिष्यती" ति । क्रमस्वरूपं व्याचक्रुः श्रीमत्प्रभुचरणाः—"मर्य्यादास्थावपि ज्ञानिभक्तौ चेदनुगृह्णाति विशेषतस्तदा आदौ पुष्टिमार्गं प्राप्य तन्मार्गीयां भक्तिं प्राप्नुतः इत्याहुः—उभयोरिति । यदि मर्यादायामेवाऽङ्गीकारस्तदोभयोर्मुक्तिरेव फलिष्यतीत्याशय" इति । अयमेव क्रमपदाशय इत्यत्र मार्गभेदेनाऽङ्गीकारान्यथानुपपत्तिं प्रमाणयन्तः पुष्टिमार्गप्राप्तिपदार्थोऽपि क्रमघटित इति तत्क्रमस्वरूपं विवव्रुः श्रीगोकुलाधी-

शाः—"उभयोरित्यस्याऽऽभास उक्तो मर्यादास्थावपीति। अयमाशयः। यदि मर्यादापुष्टिमार्गीययोरप्येकमेव फलं स्यात् तदा मार्गभेदेनाऽङ्गीकारोऽनुपपन्नः स्यात्। मूले च साधारण्येनोभयोरपि फलैक्यप्रतिपादनाद्भवति सन्देहः। तस्मादुक्तम्—यद्युभावपि अनुगृह्णाति तदोभयोरपि मर्यादांशं त्याजयित्वा केवलपुष्टिमार्गप्रवेशं कारयित्वा पूर्वोक्तं सेवारूपं फलं प्रयच्छति। तथा नाऽङ्गीकरोतीति चेत्तदोभयोरपि मुक्तिमेव ददातीति। एतदेवोक्तम्—यदीति। केवलपुष्टिमार्गः फलदशापन्नः पुष्टिमार्गः। तत्प्राप्तिर्मर्यादात्यागपूर्विकेत्युक्तम्—मर्य्यादांशं त्याजयित्वेति। एतेन अनुपदं विवक्षितस्वरूपे साधनदशापन्ने पुष्टिमार्गे प्रवेश उक्तः। मर्यादांशत्यागस्य साधनदशापन्नपुष्टिमार्गप्रवेशस्य च प्रवेशनिर्गमनयोरिवैक्यात्। तथाच धर्मद्वारा धर्मिपरां मर्यादां त्याजयित्वा साक्षाद्धर्मिपरमर्य्यादारूपं साधनावस्थापन्नं पुष्टिमार्गं प्रापयित्वा तत्फलरूपं शुद्धपुष्टिमार्गञ्च प्रापयित्वा तत्फलं प्रयच्छतीति तदर्थः सम्पद्यते। क्रमपदस्वारस्यात्। अन्यथा क्रमेणैवेति सावधारणपदस्वारस्यं हीयेत। अनुग्रहबलविचारे तस्य क्रमानपेक्षत्वेऽपि "चेदनुगृह्णाति विशेषतस्तदा तन्मार्गीयां भक्तिं प्राप्नुत" इति "यद्यनुगृह्णाति तदा पूर्वोक्तं सेवारूपं फलं प्रयच्छती" ति चाऽनुक्त्वा यो यं गुरुतर उल्लेखः सोऽपि क्रमपदस्वारस्यैकप्रयोजन एवेति 'तदा आदौ पुष्टिमार्गं प्राप्ये" त्यादि "तदोभयोरपि मर्यादांशं त्याजयित्वे" त्यादि च कथनं यत् तत् साक्षाद्धर्मिपरया मर्यादया शुद्धपुष्ट्युदयाभिप्रायेणेति ज्ञेयम्। "ब्रह्मविदाप्नोति परमि" त्यादिवचनप्रपञ्चोऽत्र प्रमाणम्। आकरेषु तद्विस्तरो द्रष्टव्यः। यद्यपीह "यद्यनुगृह्णाति विशेषत" इत्युक्त्या तदनुग्रहस्य नैयत्यं नास्तीति, दौर्लभ्यञ्च, सूचितम्। तथापि "स्वयं समुत्तीर्य्य

सुदुस्तरं द्युमन् भवार्णवं भीममदभ्रसौहृदाः । भवत्पदाम्भोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवानि" ति वचनेन सत्स्वनुग्रहस्तस्य नियतः । तत्सङ्गेन मर्यादास्थस्य पुष्टिलाभः सूपपन्नः । तत एव "सत्सङ्गलब्धया भक्त्या मयि मां य उपासिता । स वै मे दर्शितं सद्भिरञ्जसा विन्दते पदम्" "यथाऽवरुन्धे सत्सङ्गः सर्वसङ्गापहो हि माम्" "सत्सङ्गेन हि दैतेयाः" "सत्सङ्गान्मामुपागता" इत्यादीनि वचनानि । तत एव च कृष्णाश्रयमिदं स्तोत्रं यः पठेत्कृष्णसन्निधौ । तस्याऽऽश्रयो भवेत्कृष्ण इति श्रीवल्लभोऽब्रवीत्" "तवाऽष्टकमिदं मुदा पठति सूरसूते सदा समस्तदुरितक्षयो भवति वै मुकुन्दे रतिः । तया सकलसिद्धयो मुररिपुश्च सन्तुष्यति स्वभावविजयो भवेद्वदति वल्लभः श्रीहरेरि" त्यादीनि श्रीमदाचार्य्यचरणवचांसि । एवमभिप्रायकमेव "उभयोस्तु क्रमेणैव पूर्वोक्तैव फलिष्यती" ति सिद्धवत्कारेण श्रीमदाचार्य्यचरणवचनामृतमित्यलं प्रसक्तानुप्रसक्तेनेति दिक् । तेन सत्प्रवर्त्तिते शुद्धपुष्टिमार्गे शिष्टाचारानुच्छेद उक्तः ।

साक्षाद्धर्मिपरा मर्यादा तु ततः सुतरामतिविलक्षणा । शुद्धपुष्टितत्फलयोरव्यभिचारेण च सद्यश्च साक्षादेव च प्रापकत्वात् । सा चैकादशस्यैकोनविंशे—"भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेऽनघः । पुनश्च कथयिष्यामि मद्भक्तेः कारणं परम् । श्रद्धाऽमृतकथायां मे शश्वन्मदनुकीर्त्तनम् । परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम । आदरः परिचर्य्यायां सर्वाङ्गैरभिवन्दनम् । मद्भक्तपूजाऽभ्यधिका सर्वभूतेषु मन्मतिः । मदर्थेष्वङ्गचेष्टा च वचसा मद्गुणेरणम् । मय्यर्पणञ्च मनसः सर्वकामविवर्जनम् । मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च । इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः । एवं धर्मैर्मनुष्याणामु-

द्धवाऽऽत्मनिवेदिनाम् । मयि सञ्जायते भक्तिः कोऽन्योऽर्थोऽस्याऽवशिष्यते” इत्यनेन साक्षाद्भगवता निरूपिता । तत्रोपक्रमे “ज्ञानं विशुद्धं विपुलं यथैतद्वैराग्यविज्ञानयुतं पुराणम् । आख्याहि विश्वेश्वर विश्वमूर्त्ते त्वद्भक्तियोगञ्च महद्विमृग्यमि” ति श्रीमदुद्धवैः पृष्टम् । तदुत्तरे “भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेऽनघः । पुनश्च कथयिष्यामि मद्भक्तेः कारणं परमि” त्यादि श्रीयदुवंशोदयाचलचूडामणिनोक्तम् । महद्भिः श्रीपुरहरनारदव्यासशुकादिभिर्विमृग्यः । तैस्तदलाभात् । एवम्भूतो भक्तियोगः पुष्टिपुष्टिमार्गीयः शुद्धपुष्ट्यपरपर्य्यायस्तैः पृष्टः । श्रीभगवताच “भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेऽनघः” इत्यधिकारविशेषापेक्षनिरूपणतयाऽतिदुर्लभोऽतिगोप्यश्च सर्वोत्तमश्च भक्तियोगः “पुरैवोक्त” इति प्रागेव स्वेन तत्कथनं स्मारयता श्रीमद्व्रजरत्नेष्वेव ग्राहितः । तच्चोदाहरिष्यते । श्रीमद्व्रजरत्नानां भक्तियोगोऽनघः । श्रीपुरहरनारदादीनां न तथेति तु “धन्या अहो अमी आल्यो गोविन्दाङ्घ्र्यब्जरेणवः । यान् ब्रह्मेशो रमा देवी दधुर्मूर्ध्न्यघनुत्तय” इत्यादिवचनैः स्पष्टम् । विद्वन्मण्डननित्यलीलावादादिषु च विशिष्य निरूपितमिति विशेषोदन्या ततः शमयितव्या । किञ्च तस्य तदेकलब्धतया महद्भिः श्रीपुरहरनारदादिभिरपि तदप्राप्त्या चाऽन्येषान्तदर्थिनां सुतरां तदनुपयोगः । तथा सति पुरा तत्कथनं क्वोपयोगाय । तल्लाभो यथा भवेत्तद्वक्तव्यम् । स्थूणानिखनन्यायेन महद्विमृग्यत्वनिश्चयेच्छया च प्रश्नः । अन्यथा पुरा तत्कथनस्य “अथैतत्परमं गुह्यं शृण्वतो यदुनन्दन । सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखे” ति वचनेन श्रीभगवता परमानुग्रहपूर्वकत्वबोधनात्तत एव महद्विमृग्यत्वसूचनाच्च मुख्याधिकारिणस्तद्विस्मरणासम्भवेन तत्प्रश्नो नोपपद्यते । तत्र मह-

द्विमृग्यत्वं श्रीमद्व्रजवरसीमन्तिनीनां भक्तियोगस्य, तत्कथनोपक्रमे "अथैतत्परमं गुह्यमि" ति वचनेन, "रामेण सार्धं मथुरां प्रणीते श्वाफल्किना मय्यनुरक्तचित्ताः । विगाढभावेन न मे वियोगतीव्राधयोऽन्यं ददृशुः सुखाये" त्यादिभिर्वक्ष्यमाणैः पूर्वोक्तभक्तियोगवचनैर्विस्फुरत्तममपि, तत्प्रश्नानुसारेण, मन्दानामसम्भावनाविपरीतभावनाद्यनुदयाय, स्थूणानिखननरीत्या, "भक्तियोगः पुरैवोक्त" इत्यर्धेन पुनर्निश्चायितम् । तत्प्राप्तिसाधनेच्छा प्रश्न इदानीं पूरयितव्यः । अन्यथा तत्कथनमकथनसदृशं स्यात् । "त्वं मे भृत्यः सुहृत्सखे" ति तदुपक्रमे प्रदर्शितायाः करुणाया विप्रलिप्सात्वञ्च भवेत् । तस्माद्यया करुणया महद्विमृग्यभक्तियोगकथनं तयैव मुख्यस्वरूपानन्दफलिकया करुणया तत्साधनकथनं श्रीभगवानुवाच—"पुनश्च कथयिष्यामि मद्भक्तेः कारणं परमि" ति । एवञ्च महद्विमृग्यतया यथा प्रतिपित्सितस्य भक्तियोगस्य परमदुर्लभत्वम् । अनुग्रहैकलभ्यत्वात् । तथा तत्कारणस्य परमानुग्रहेणैवोच्यमानत्वात्परमत्वमपि । तच्च शीघ्रमव्यभिचारेण जनकत्वम् । तथाच तद्दौर्लभ्यवद्विवक्षितसाधनानुष्ठानेन तत्सौलभ्यमपि परममेवेति तथा प्रवृत्तस्य न काचिच्चिन्तेति । तत एव "चिन्ता कापि न कार्य्या निवेदितात्मभिः कदापीति । भगवानपि पुष्टिस्थो न करिष्यति लौकिकीञ्च गतिमि" ति निष्कृष्टमुक्तं श्रीमदाचार्य्यचरणैः । व्याख्यातञ्च तथा श्रीमत्प्रभुचरणैः । एतेन तत्साधनानामपि महद्विमृग्यत्वं व्याख्यातम् । अन्यथा सौलभ्यै तत्प्रश्नोत्तरयोरनवसरपराहतत्वात् । ततश्च "आख्याहि विश्वेश्वर विश्वमूर्त्ते त्वद्भक्तियोगञ्च महद्विमृग्यमि" ति प्रश्नस्य विशेषणांशनिश्चिकीर्षातत्साधनज्ञानेच्छाप्रयुक्तत्वेऽपि तत्साधनानामपि महद्विमृग्यभक्तियोगत्वेनैव प्रश्नः । तयैव चोत्तरमाह—

"पुनश्च कथयिष्यामी" त्यादिना । अन्यथा पुरोक्तस्य फलत्वादिहोक्तस्य साधनरूपत्वात्फलरूपस्य भावरूपतयाऽऽन्तरत्वात्साधनरूपस्य बाह्यत्वात्तस्योक्तत्वादस्य च वक्ष्यमाणत्वात् पुनः कथनं न प्राप्नोति । तस्मात् पुनः कथनोक्तिबलान्महद्भिर्मृग्यभक्तियोगत्वेनैव परमकारणकथनप्रतिज्ञेति द्रष्टव्यम् ।

तदेवमेककरुणैककारणकत्वात्साक्षाद्धर्मिपर्य्यवसन्नतया फलैक्यात्समाख्यैक्याच्च साक्षाद्धर्मिपरा मर्यादा प्रथमकक्षाविश्रान्ता मुख्या पुष्टिरेव । न तु धर्मद्वारा धर्मिपरायामिवाऽऽन्यशेषतयोपक्षीणेह पुष्टिरिति । किन्तु पुष्टिपुष्टाविव मुख्येति । ततश्च " मुख्ये सम्प्रत्यय " न्यायेन कारणफलयोरन्तरोपस्थिततयां "तन्मध्यपतित" न्यायेन च पुष्टिशब्देनैव व्यवजह्रुरेनां श्रीमदाचार्य्यचरणाः । तद्यथा सिद्धान्तमुक्तावल्याम्–" ज्ञानाभावे पुष्टिमार्गी तिष्ठेत्पूजोत्सवादिषु । मर्यादास्थस्तु गङ्गायां श्रीभागवततत्परः । अनुग्रहः पुष्टिमार्गे नियामक इति स्थितिरि " ति । तथैव च व्यवजह्रुरेतद्विवृण्वन्तः श्रीमत्प्रभुचरणाः " स्वस्वरूपज्ञानप्रभुस्वरूपज्ञानाभाववान् भक्तोऽपि मर्यादापुष्टिभेदेन द्विविधः । उभयोश्चित्तचाञ्चल्याभावायाऽऽहुः—ज्ञानाभाव इति । पुष्टिमार्गीये विशेषमाहुः—अनुग्रह इती " ति । तथापि पुष्टिशब्देनेह फलदशापन्नशुद्धपुष्टिभ्रमो मा भूदिति तट्टिप्पण्यामाहुः श्रीगोकुलाधीशाः–" पुष्टिभेदेनेति । अत्रापि मर्यादापुष्टिरेवेत्यर्थः । केवलपुष्टस्य भगवत्स्वरूपाज्ञानाभावेन चित्तचाञ्चल्याभावादित्यर्थः । पुष्टिमार्गीय इति । केवलमर्यादामार्गीयत्वाद्विशेष इत्यर्थ " इति । तेन फलदशापन्ने भक्तियोग एव मुख्यं पुष्टित्वं न साधनावस्थापन्न इत्यातिष्ठानाः पुष्टिपदव्यपदेश्यत्वमस्य नेच्छन्ति ये, ते श्रीमदाचार्य्यचरणसिद्धान्तलक्ष्यात्सुदूरं परिभ्रष्टाः स्वार्थान्धाः पाषण्डिनस्तत्प्रतारिता भ्रान्ता

६

वा सिद्धयन्तीत्यनुसंहितमिदं सच्छिखामणिशेखरितचरण-नलिनयुगलरेणुकणलाभपवित्रितभूवलयैः श्रीमदाचार्य्यचरण-परिचरणप्रवणैः । आस्ताम् ।

येयं साक्षाद्धर्मिपरा मर्यादा एककरुणैककारणकत्वादिना पुष्टिपदेन युक्तं व्यपदिश्यते। तथापि केवलपुष्टेः केवलाया मर्यादायाश्च व्यावर्त्त्यमाना मर्यादा पुष्टिरित्यप्युच्यते । सैव मर्यादा-भक्तिरित्यपि विवेकेप्सुभिरभिलप्यते । तथाच भक्तिहंसः— "प्रेमात्मकभक्तिसाधनत्वेन क्रियमाणः श्रवणादिर्भक्तिमार्गे मर्यादाभक्तिरित्युच्यते" इति । परतः पुरुषार्थत्वेन साधनकरणादस्य मर्यादाभक्तित्वमिति तद्विवेके श्रीपुरुषोत्तमाः । यद्यपि स्नेहाभावे तदुदयमाकाङ्क्षतां स्नेहवदुपदेशानुसारेणैव श्रवणादिः । तदनुसारित्वबोधनायैव "भक्तिमार्गे मर्यादाभक्ति-रित्युच्यत" इति श्रीमत्प्रभुचरणोक्तिः। स्नेहवदुपदेशश्च स्वतन्त्र-पुरुषार्थत्वेन साधनानुष्ठानबोधकः । न तु मोक्षादिशेषत्वेन तद्बोधकः । यदाहुः—"एकान्तलाभं वचसो नु पुंसां सुश्लोक-मौलेर्गुणवादमाहुः । श्रुतेश्च विद्वद्भिरुपाकृतायां कथासुधाया-मुपसम्प्रयोगमि" त्यादि । तत एव स्नेहोदयस्ततः फलिष्यति । तत एव च स्नेहोदयक्रमेण तदनुष्ठानं स्वतन्त्रपुरुषार्थत्वेन पर्य-वस्यत् ततः फलिष्यति । तत्क्रतुन्यायात् । "एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम् । यत्सत्यमनृतेनेह मर्त्येनाऽऽप्नोति माऽमृतमि" ति ब्रह्मवादसमाप्तौ भगवद्वाक्याच्च । तथापि स्नेह-वदुपदेशानुसारेण स्वतन्त्रपुरुषार्थतया साधनानुष्ठानं यत् तत् स्नेहोदयोपयोग्येव । तदानीं स्वतन्त्रपुरुषार्थत्वेन श्रवणादेः सम्भावनाऽपि का । एवञ्च परतः पुरुषार्थत्वमपि तत्र लब्ध-व्यवस्थानमिति न कश्चित्सन्देहावसरः ।

"यमेवैष वृणुते तेन लभ्य" इति श्रुत्युक्तस्य भगवल्लाभस्य 'भक्त्याऽहमेकया ग्राह्यः' इति श्रीमद्भागवतवचनेन स्नेहद्वारैव जातस्य, प्रमितिरूपत्वबोधनात्स्नेहस्य परमावश्यकतायां, तद्धेतुतयाऽनुष्ठीयमानायामपि, साक्षाद्धर्मिपरात्वं निर्बाधम्। स्नेहवदुपदेशानुसारितया, स्नेहवत्स्नेहेन, दध्नः सर्पिषेव, तन्म यत्वाच्च, तस्याः साक्षाद्धर्मिपरात्वं विभासमानमस्ति। तत एव "श्रद्धाऽमृतकथायां मे शश्वन्मदनुकीर्त्तनमि" त्यादिषु साधनदशापन्नमुख्यपुष्टिस्वरूपमहाद्भिमृग्यभक्तियोगबोधकेषु भगवद्वचनेषु केवलधर्मिपरत्वबोधकोऽस्मत्पदाभ्यासः। उपसंहारे च "एवं धर्मैर्मनुष्याणामुद्धवाऽऽत्मनिवेदिनाम्। मयि सञ्जायते भक्तिः कोऽन्योऽर्थोऽस्याऽवशिष्यत" इति भगवत्यात्मनिवेदनपूर्वकमेव कथाश्रद्धादीनामनुष्ठानकथनमिति साक्षाद्धर्मिपरात्वमपाणिपिहितम्। एवमेव हि साक्षाद्धर्मिपरात्वे शुद्धपुष्टिस्ततः फलति नान्यथेत्यप्यस्मत्पदाभ्यासादिनैव आत्मनिवेदनपूर्वकत्वोक्त्या च सिद्धम्। "एषा बुद्धिमतां बुद्धिरि–" त्यादिना ब्रह्मवादसमाप्तावुक्तेन भगवद्वाक्येन कथञ्चिद्यदृच्छया मन्त्रग्रहणेन सम्प्रदाये जातप्रवृत्तेरपि तत्स्वरूपाद्यनभिज्ञस्य विप्रकृष्टाधिकारिणोऽपि भगवल्लाभनिश्चयं प्रति सम्पूर्णरीत्या समाश्वासनं स्थितमिति साक्षाद्धर्मिपरात्वे किमधिकं वक्तव्यमवशिष्यते।

किञ्च। एकादशस्योनात्रिंशे उद्धव उवाच—"सुदुस्तरामिमां मन्ये योगचर्य्यामनात्मनः। यथाऽञ्जसा पुमान् सिद्ध्येत्तन्मे ब्रूह्यञ्जसाऽच्युते" त्यादि। एवं प्रश्ने–श्रीभगवानुवाच–"हन्त ते कथयिष्यामि मम धर्मान् सुमङ्गलान्। यान् श्रद्धयाऽऽचरन्मर्त्यो मृत्युं जयति दुर्जयम्। कुर्य्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन्। मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरातिः। देशान्

पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान् । देवासुरमनुष्येषु मद्भक्ताचरितानि च" त्यादिना साक्षाद्धर्मिपरां मर्य्यादाम् । एकादशस्यैकादशेऽपि "श्रद्धालुर्मे कथाः शृण्वन् सुभद्रा लोकपावनीः । गायन्ननुस्मरन्कर्म जन्म चाऽभिनयन् मुहुः । मदर्थे धर्मकामार्थान् आचरन्मदपाश्रयः । लभते निश्चलां भक्तिं मय्युद्धव सनातने" इति सा निरूपिता । अन्यान्यप्येवञ्जातीयकानि "भक्त्या त्वनन्यया शक्यः" "भक्त्याऽहमेकया ग्राह्य" इत्येकयोक्त्या साध्यसाधनरूपभक्तिद्वये भगवल्लाभहेतुत्वबोधकानि वचनानि "भक्त्या सञ्जातया भक्त्ये" त्यादीनि "मन्मना भव मद्भक्त" इत्यादीनि च वचनानि तन्निरूपकाण्यनुसन्धेयानि । साक्षाद्धर्मिपरतयैव "मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये । मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ । लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतमि" त्युक्तलक्षणकत्वेन निर्गुणभक्तिमार्ग एवेयं साक्षाद्धर्मिपरा मर्य्यादा । एवं सति साधनरूपत्वेऽपि मुख्यफलरूपत्वाभावेऽपि शुद्धपुष्टिरूपैवेयम् । विशेषजिज्ञासायां सावरणभङ्गसप्रकाशनिबन्धसर्वनिर्णये भक्तिमार्गोपपादनं द्रष्टव्यम् । एतावता लोकवेदातीतत्वमप्यस्याः स्थितम् । एतस्याः शुद्धपुष्टितत्फलप्रापिकाया मर्य्यादायाः पुष्टिपाषण्डेन वा मर्य्यादात्वभ्रान्त्या वा त्यागस्तु सर्वथा पुष्टेर्भ्रंशकर एवेति ज्ञेयम् । तत्त्यागस्तु कियानिदानीं जातस्तेन च कियान् पुष्टेर्भ्रंशोऽपि जीवानामिति तु केवलं श्रीमदाचार्य्यचरणैः श्रीमत्प्रभुचरणैरेव च बोधयितव्यं जनस्य । हा धिक्! "कथाः कथयताऽपराः" ।

पुष्टिपुष्टिस्तु—"यमेवैष वृणुते तेन लभ्य" इति प्रकारविशेषनियममनपेक्ष्य वरणलभ्यत्वश्रुत्या तत्तदुक्तप्रकारकवरणवत् सर्वसाधनराहित्यप्रकारकवरणेनाऽऽत्मलाभो यत् तत् । तदर्थि-

तया तत्साधनेष्वप्रवर्त्य भावदानम् । तथाचोपबृंहणानि—"न साधयति मां योगो न साङ्ख्यं धर्म उद्धव । न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्ज्जिता" "नाहं वेदैर्न तपसा न दानेन न चेज्यया । शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा । भक्त्या त्वनन्यया शक्यः अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुञ्च तत्त्वेन प्रवेष्टुञ्च परन्तप" "अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज । साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः । नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना । श्रियं चाऽऽत्यन्तिकीं ब्रह्मन् येषां गतिरहं परा । ये दारागारपुत्राप्तप्राणान् वित्तमिमं परम् । हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे । मयि निर्बद्धहृदयाः साधवः समदर्शिनः । वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा" "नालं द्विजत्वं देवत्वमृषित्वं वाऽसुरात्मजाः । प्रीणनाय मुकुन्दस्य न वृत्तं न बहुज्ञता । न दानं न तपो नेज्या न शौचं न व्रतानि च । प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बनम्" "भक्त्याऽहमेकया ग्राह्यः" "भक्त्या तुतोष भगवान् गजयूथपाये" त्यादीनि । "ते नाधीतश्रुतिगणा नोपासितमहत्तमाः । अव्रतातप्ततपसः सत्सङ्गान्मामुपागता" इत्यादीनि च । भक्तेरूर्ज्जितत्वं योगादिनैरपेक्ष्योक्त्या व्यक्तमपि "अहं भक्तपराधीन" इत्यादिना "सत्स्त्रियः सत्पतिं यथे" त्यन्तेन फलतोऽप्यव्यभिचारितया पुनर्द्राढितम् । एतेन तदर्थितया तत्साधनेष्वप्रवर्त्य भावदानं यदुक्तं तदेवंविधमूर्ज्जस्वलं विवक्षितमित्युक्तम् । अयमेव तावत्फलरूपो महद्भिर्मृग्यो भक्तियोगोऽपि । तथाहि—एकादशस्यैकादशोपसंहारे "इष्टापूर्त्तेन मामेवं यो यजेत समाहितः । लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया । प्रायेण भक्तियोगेन सत्सङ्गेन विनोद्धव । नोपायो विद्यते सध्र्यङ् प्रायणं हि सतामिहे" त्युक्त्वा "अथैतत्परमं गुह्यं शृण्वतो

यदुनन्दन । सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखे " इति भिन्नप्रक्रमेण परमगुह्यकथनं प्रतिज्ञाय द्वादशे श्रीभगवानुवाच— "न रोधयति मां योगो न साङ्ख्यं धर्म एव च । न स्वाध्यायस्तपस्त्यागो नेष्टापूर्त्तं न दक्षिणा । व्रतानि यज्ञाश्छन्दांसि तीर्थानि नियमा यमाः । यथाऽवरुन्धे सत्सङ्गः सर्वसङ्गापहो हि माम् । सत्सङ्गेन हि दैतेया यातुधानाः खगा मृगाः । गन्धर्वाप्सरसो नागाः सिद्धाश्चारणगुह्यकाः । विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोऽन्त्यजाः । रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन् युगेऽनघ । बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः । वृषपर्वा बलिर्बाणो मयश्चाऽथ विभीषणः । सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः । व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथाऽपरे । ते नाऽधीतश्रुतिगणा नोपासितमहत्तमाः । अव्रतातप्ततपसः सत्संगान्मामुपागताः । केवलेन हि भावेन गोप्यो गावो नगा मृगाः । येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसा । यं न योगेन साङ्ख्येन दानव्रततपोध्वरैः । व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि । रामेण सार्धं मथुरां प्रणीते श्वाफल्किना मय्यनुरक्तचित्ताः । विगाढभावेन न मे वियोगतीव्राधयोऽन्यं ददृशुः सुखाय । तास्ताः क्षपाः प्रेष्ठतमेन नीताः मयैव वृन्दावनगोचरेण । क्षणार्धवृत्ताः पुनरङ्ग तासां हीना मया कल्पसमा बभूवुः । ता नाऽविदन्मय्यनुषङ्गबद्धधियः स्वमात्मानमदस्तथेदम् । यथा समाधौ मुनयोऽब्धितोये नद्यः प्रविष्टा इव नामरूपे । मत्कामा रमणं जारं मत्स्वरूपाविदोऽबलाः । ब्रह्म मां परमं प्रापुः संगाच्छतसहस्रशः । तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनाम् । प्रवृत्तिश्च निवृत्तिश्च श्रोतव्यं श्रुतमेव च । मामेकमेव शरणमात्मानं सर्वदेहिनाम् । याहि सर्वात्मभावेन यास्यसे ह्यकुतोभयमि"ति । महद्भिर्मृग्यत्वमत्र स्पष्टम् । प्राङ्निश्चायितश्च ।

पुष्टपुष्टानां फलञ्च धर्मद्वारा धर्मिपरायां मर्यादातोऽतिविलक्षणम् । तन्निरूपितं "यन्न योगेन सांख्येने" त्यादिना वचनेन । तद्वद्यलौकिकसामर्थ्यरूपम् । "विवृणुते तनू ँ स्वामि" त्यत्र स्वरूपविवरणस्य लाभपदार्थतानिर्णयात्स्वरूपस्य च "रसो वै स" इत्यादिभिः शुद्धपूर्णरसात्मकत्वात्तस्य पूर्णतयाऽनुभवः साम्यं विना न भवति । रसाभासतापत्तेरिति तत्तादृशरसप्रचुरप्रभुस्वरूपसर्वस्वानुभवोपयोगि यत्सामर्थ्यं तदलौकिकम् । तदिदम् "अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुविवेशयतोर्वयस्यैः । वक्त्रं व्रजेशसुतयोरनुवेणु जुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षमि" त्यत्र श्रीमत्सुबोधिन्यां "भगवता सह संलापो दर्शनं मिलितस्य च । आश्लेषः सेवनं चापि स्पर्शश्चाऽपि तथाविधः । अधरामृतपानञ्च भोगो रोमोद्गमस्तथा । तत्कूजितानां श्रवणमाघ्राणं चाऽपि सर्वतः । तदन्तिकगतिर्नित्यमेवं तद्भावनं सदा । इदमेवेन्द्रियवतां फलं मोक्षोऽपि नाऽन्यथे" त्येताभिः कारिकाभिरभिदर्शितम् । फलप्रकरणादिषु च "साक्षान्मन्मथमन्मथः" "आत्तगजेन्द्रलीलः" "इभराडिव भिन्नसेतुरि" त्यादिना "तरङ्गोत्क्षिप्तमोक्षेषु पञ्चाध्यायीरसाब्धिषु । पुनरुत्थानरहितं चित्रं बिन्दौ निमज्जनमि–" ति "भावैरङ्कुरितं महीमृगदृशामाकल्पमासञ्चितैः प्रेम्णा कन्दलितं मनोरथमयैः शाखाशतैः सम्भृतम् । लौल्यैः पल्लवितं मुदा कुसुमितं प्रत्याशया पुष्पितं लीलाभिः फलितं भजे व्रजवनीशृङ्गारकल्पद्रुममि" ति श्रीमत्प्रभुचरणपद्याभ्यां शृङ्गाररसमण्डनादिभिर्विज्ञप्त्यादिभिश्चाऽन्यतश्च तेभ्यस्तेभ्यः पुष्टिमार्गीयेभ्यो ग्रन्थेभ्यो विशदम् । तुरीयस्य तुरीये "प्रदीपवदावेशस्तथाहि दर्शयती" त्यधिकरणे च प्रपञ्च्येदं प्रत्यपादि । तथाहि तद्भाष्यम्—"ननु पूर्णज्ञानक्रियाशक्तिमता ब्रह्मणा तुल्य-

भावेन तत्रापि प्रधानभावं प्राप्य कामभोगकरणमपूर्णज्ञानक्रियावतो भक्तस्याऽनुपपन्नमित्याशङ्कायां तत्रोपपत्तिमाह । न हि तदा नैसर्गिकज्ञानक्रियाभ्यां तथा भोक्तुं शक्तो भवति । किन्तु भगवांस्तस्मिन्नाविशति यदा तदाऽयमपि तथैव भवतीति सर्वमुपपद्यते । एतदेवाऽऽह—प्रदीपवदिति । यथा प्राचीनः प्रकृष्टो दीपः स्नेहयुक्तायां वर्त्त्यामर्वाचीनायामाविष्टः स्वसमानकार्य्यक्षमां तां करोति । स्नेहाधीनस्थितिश्च भवति स्वयम् । तथाऽत्राऽपीत्यर्थः । अत्र प्रमाणमाह । तथा हि दर्शयति श्रुतिः । "भर्त्ता सन् भ्रियमाणो विभर्त्ति एको देवो बहुधा निविष्ट" इति । सर्वान् कामानित्युक्तत्वाद् यस्य कामस्य भोगो यथा निवेशे सति तत्तथा तदा निवेश इति बहुधा निवेश उक्तः । अयं निवेशो नाऽन्तर्यामित्वेन । तस्यैकधैव प्रवेशात् । निसर्गतः सर्वेषां जीवानां भगवान् भवत्येव प्रभुर्यद्यपि तथापि यं स्वीयत्वेन वृणुते तस्य विवाहितः पतिरिव भर्त्ता सन् वरणजस्नेहातिशयेन भक्तेनाऽपि भ्रियमाणः सन् स भक्त इव स्वयमपि तं स्वस्मिन् बिभर्त्ति । अत एव स्नेहराहित्येनाऽयोगोलकादिकं विहाय प्रदीपं दृष्टान्तमुक्तवान् व्यासः । अत एव देवपदमुक्तम् । स्वरूपानन्ददानाद्भावोद्दीपनात्पूतनादिमुक्तिदानेन स्वमाहात्म्यद्योतनाद्वैकुण्ठादिस्थितेश्च । तदुक्तं निरुक्ते—दिवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देव इति । किञ्च । भक्तानां कामभोजनार्थं क्रीडाकरणात्क्रीडायामेव जयेच्छाकरणाद्भक्तैः सह व्यवहारकरणाद्भक्तेषु स्वमाहात्म्येच्छादिद्योतनान्न पारयेऽहं न त्वादृशीं प्रणयिनीमित्यादिभिः स्तुतिकरणाद्भक्तप्रपत्तिदर्शनेन कालीयदमनादौ मोदकरणात्तेष्वेव भक्तिमदकरणात्ते स्वप्नेऽपि प्रियमेव पश्यन्तीति स्वप्नकरणात्तेषां कान्तिकरणादिच्छाकरणाद्वा तन्निकटे गमना-

द्पि देवः । तदुक्तं धातुपाठे—दिवु क्रीडाविजिगीषाव्यवहार-द्युतिस्तुतिमोदमदस्वप्नकान्तिगतिष्विति । एवं सति युक्तमेव तेषां तथात्वमिति हिशब्देनाऽऽहे'' ति । तेन यः पुष्टपुष्टानां भगवदनुभवः स श्रीपुरहरादीनां पूर्वोक्तरीत्या पुष्टिभक्तत्वेऽपि स्वरूपपरत्वेऽपि तल्लाभेऽपि तेषां फलात्परमो विलक्षणः सुमेरु-सर्षपयोरिव साम्यमेव प्रमेयबलप्राप्ततया स्वरूपनिष्ठतया च धत्तां नाम । न ततोऽधिकमपीति सत्यनुग्रहे सति च भाग्यो-दये चेच्छ्रीपुरहरादिप्राप्यफलतो महावैलक्षण्यानुसन्धित्सा तदास्वादकुतूहलश्च तदुभयं तादृशभगवदनुग्रहैकलभ्यशुद्धपुष्टि-मार्गीयचरणपरिचरणेन पूरणीयमिति दिक् ।

पुष्टिपुष्टौ केवलं भावदानमुक्तम् । तद्भावस्वाभाव्येन तद्भाव-वत्सु "कृष्णः कमलपत्राक्षः पुण्यश्रवणकीर्त्तनः । स्तूयमानोऽ-नुगैर्गोपैः साग्रजो व्रजमाव्रजदि" त्यत्रोक्तरीतिकं श्रवणादिक-मावश्यकम् । तद्द्रष्टव्यं श्रीमत्सुबोधिन्याम् । तादृशं यच्छ्रव-णादि तदेव पुष्टिभक्तिरित्युच्यते । तच्च प्रेमात्मकभक्तिसाधन-त्वेन क्रियमाणाच्छ्रवणादेरुत्तमम् । तदुक्तं भक्तिहंसे—"स्ने-होत्पत्त्यनन्तरं स्वव्यसनतः स्वतन्त्रपुरुषार्थत्वेन क्रियमाण उत्तमः पुष्टिभक्तिरूपः । मत्सेवया प्रतीतञ्च सालोक्यादि चतु-ष्टयम् । नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत्कालविप्लुतम् । नैकात्मतां मे स्पृहयन्ति केचिन्मत्पादसेवाभिरता मदीहाः । महतां मधुद्विट्सेवानुरक्तमनसामभवोऽपि फल्गुः । नारायण-परा लोके न कुतश्चन बिभ्यति । स्वर्गापवर्गनरकेष्वपि तुल्यार्थ-दर्शिन इत्यादिवाक्यैस्तथात्वं ज्ञेयमि"त्यन्तेन । तथात्वमुत्त-मत्वम् । तेन पुष्टिपुष्टिः पुष्टिभक्तिश्चेत्यनर्थान्तरम् । तथैव तया शुद्धपुष्टिः केवलपुष्टिरित्येतदप्यनर्थान्तरम् । स्वतन्त्रायां पुष्टि-पुष्टौ, पूर्वोक्तया साक्षाद्धर्मिपरया मर्यादया शुद्धपुष्टिरूपयैव

साध्यायामपि च पुष्टिपुष्टौ, साधनस्पर्शाभावात् । एवञ्च उभय्या अपि पुष्टपुष्टेस्तारतम्यसम्भावनागन्धसम्बन्धशून्यतया वस्त्वैक्यं स्थितम् ।

भावः साधनम् । अलौकिकसामर्थ्येन भगवदास्वादः फलम् । साधनतः फलतश्च स्वतन्त्राया एतस्या मुख्यायाः शुद्धपुष्टेः प्रवर्त्तनमेव श्रीमदाचार्य्यचरणानां प्रादुर्भावेऽनन्यसाधारणं प्रयोजनम् । अवतारानवतारकालाभ्यां प्रवर्त्तने प्रकारभेदस्तु नाप्राप्तः । स च प्राग्दत्तविस्तरः । तदानीं रूपेण । इदानीं नाम्ना । तदानीं वेणुनादद्वारा । इदानीं श्रीमदाचार्य्यचरणैरित्यादिहेतुसहस्रैश्च शक्यविवेकः । एवं सति साक्षाच्छुद्धपूर्णरसात्मकभगवत्स्वरूपेण ताद्दशरसाब्धिपूर्णालौकिकदिव्यश्रीविग्रहाः श्रीमदाचार्य्यचरणाः शुद्धपुष्टिमार्गप्रवर्त्तनायाऽऽज्ञप्ता भूमौ प्रादुर्भूतास्ताद्दशशुद्धपुष्टिमार्गं प्रवर्त्तयिष्यन्तः स्नेहे भक्तिपदशक्तिं निर्धार्य स्नेहस्य च रतिरूपत्वभावरूपत्वादि व्याख्याय स्नेहमार्गे स्नेहस्यैव नियामकत्वं कर्ममार्गे विधेः प्राधान्यमिव समुपपाद्य ताद्दशस्नेहैकरसं व्रजाधीशसेवासरणिरूपं शुद्धपुष्टिमार्गं स्थापितवन्तः । उपादानं विना वस्तुस्थितेरसम्भववद्ब्रह्मवादं विना पुष्टिस्थितेरसम्भवं विभाव्य तदुपयोगिनं ब्रह्मवादञ्च ते संस्थापयामासुः । स्नेहस्यैव स्नेहमार्गे नियामकत्वस्थापनेन तदभाववतां तदुदयमाकाङ्क्षतां मनोरथाभिपूर्त्त्यै अविधिज्ञबालककृतसन्ध्यावन्दनादौ विधिज्ञोपदेशस्य नियामकत्ववत्तेषां स्नेहवदुपदेशो नियामक इति व्यवस्थापितवन्तः । तथापि जातस्नेहानाञ्जनिष्यमाणस्नेहानाञ्च साम्यं न सम्भवति । अजातस्नेहानां स्नेहाचारेष्वतिचारस्य नियामकाभावेन सम्भवात् । तेन स्नेहवतां स्नेहाचारोपदेशो मर्यादापन्न एव स्नेहरहितेषु मुख्यफलप्रापक इति निर्धारित-

वन्तः । मर्यादा चेयं न प्रावाहिकी । नापि मोक्षादिफलिका प्रामेयिकी । किन्तु साक्षाच्छुद्धपूर्णरसात्मकभगवत्स्वरूपभजनतत्साक्षात्साधनशुद्धपुष्टिस्नेहफलकस्नेहवदुपदिष्टस्नेहोपचाराङ्गम् । साक्षाद्धर्मिपरैव हि सा । अङ्गाङ्गिभावापन्नयोर्मर्यादास्नेहाचारयोर्वैशिष्ट्येनोपदेशस्य तस्यां जागरूकत्वात् । महद्भिर्मृग्यभक्तियोगत्वं निर्गुणभक्तियोगरूपत्वं शुद्धपुष्टित्वं मुख्यपुष्टित्वं लोकवेदातीतत्वञ्च तत्सामर्थ्येनाऽसाध्यतया तस्यां प्रादर्शयाम । एवञ्च पुष्टिपुष्टाविव भावरूपत्वं भगवदास्वादफलकत्वञ्च साक्षाद्धर्मिपरायामपि मर्यादायां निर्विचिकित्समिति स्पष्टम् । साक्षाद्धर्मिपरतयैव च लोकवेदातीतत्वादिरूपया निर्गुणभक्तियोगत्वादिरूपया च भावस्योर्ज्जितत्वं "यथा भक्तिर्ममोर्ज्जिते"ति वचनादपेक्षितं तस्यां सिद्धोद्योतम् । आत्मनिवेदनपूर्वकत्वाच्च तथा । ऊर्ज्जितत्वेनाऽलौकिकसामर्थ्यं च तत्राऽस्तीति व्याख्यातम् । "प्रतिनियतेन्द्रियवद्भगवद्भक्तिरि" ति सिद्धान्तात् । यथा तांस्तान् विषयान् प्रति तदनुभावकानि तानि तानीन्द्रियाणि नियतानि । तथा भगवदनुभवाय भक्तिरिति हि तदर्थः । तच्च भगवदावेशजनितमेव । हृदय आविष्टायामेव हि कामिन्यां तदर्थं यत्नो यथा तथेहाऽपीति । "न ह्यननुभूतविषया रुचिरस्ती" ति न्यायात् । इदमलौकिकसामर्थ्यं बीजरूपम् । अग्रे फलरूपमित्यन्यदेतत् । तथापि तादृशफलात्मकशुद्धपुष्टिप्रवृत्त्याशंसया साक्षाच्छ्रीमद्वृन्दावनेन्दुनाऽवतारितानां श्रीमदाचार्य्यचरणानां करुणोत्तरवरणसामर्थ्यमहिम्ना तदनुगतानां फलरूपतयैव सापि पर्य्यवसन्ना । तेन "यथा यथाऽऽत्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः । तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाऽञ्जनसम्प्रयुक्तमि" ति न्यायेन यथाभावोदयं यथालौकिकसामर्थ्योद्बोधश्च तत्रापि

तेषां तत्तादृशरसप्रचुरभगवत्स्वरूपानुभवो निराबाधः । तत एव नायिकाया नायक इव विजातीयभावानन्तरितसजातीयभाव-प्रवाहस्तेषां "श्रद्धाऽमृतकथायां मे शश्वन्मदनुकीर्त्तनमि"-त्यादिना निरूप्यते । तत एव शुद्धपुष्टेस्ततः फलनं नाऽन्यथे-त्युक्तं प्राक् । पुष्टिपदव्यवहार्य्यत्वञ्च तस्या दर्शितम् । ततश्च साक्षाद्धर्मिपरा मर्यादा तया लभ्यमाना शुद्धपुष्टिश्च पूर्वोत्तर-दलद्वयापन्नमेकमेव भावोत्थितं भावपर्य्यवसन्नं भावैकरसञ्च वस्त्विति न कश्चित्सन्देहः । तथा सति सिद्धशुद्धपुष्टि-स्थितीनां फलार्थममृग्यत्वेऽपि, तद्रहितानां मङ्गलाय, सम्प्रदाय-स्याऽप्रतिहतायै प्रवृत्तये च, साक्षाद्धर्मिपरायास्तस्या अत्याव-श्यकत्वेन, तत्करणं मुख्यफलानुभवाविरोधीति—"अधिकं तत्राऽनुप्रविष्टं न तु तद्धानिरि" ति न्यायात्प्रत्युत प्रशस्तञ्चे-ति—तन्मर्यादास्थितिः शुद्धपुष्टिस्थेष्वपि नूनं नैव निवर्त्तते । तत एव स्वमार्गीया मर्यादेति तद्व्यवहारः ।

साक्षाद्धर्मिपरैषा मर्यादा प्रपञ्चितप्रकारेण श्रुतिगीताब्रह्म-सूत्रश्रीभागवतादौ विद्यमानाऽपि मुख्यरासात्मकफलरूपभज-नोपयोगितया तैस्तैराचार्यैः श्रीपुरहरनारदादिभिश्च शास्त्रेष्व-भिष्टुतैर्न ज्ञाता । नाप्याघ्राताऽपि । केवलन्तु श्रीमदाचार्य्य-चरणैरेव प्रकटीकृता । शास्त्रतो व्याख्याताऽपि । सर्वेऽपि धर्मद्वारैव धर्मिपरा इति । वस्तुतस्तु यथाधिकारं बोधनियमात् शुद्धपुष्टिस्थेष्वपि धर्मद्वारैव धर्मिपरत्वबोधस्तेषाम् । तत्प्रत्यक्षं भीष्मस्तुतौ "ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पि-तोरुमानाः । कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगन् किल यस्य गोपवध्व" इत्यत्र "गोपवध्वः । जात्या स्वभावेन च दुष्टाः । ता अपि यस्य सम्बन्धात्प्रकृतिं स्वरूपमगमन्नि" ति श्रीमत्सुबोधिन्यां व्याख्यानात् । "वन्दे नन्दव्रजस्त्रीणां पादरेणु-

मभीक्षणशः । यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनमि" ति वा "अक्षण्वतां फलमिदं न परं विदाम" इति शुद्धपुष्टिस्थ-निर्णीतार्थप्रशंसावचनं वा "रामेण सार्द्धं मथुरां प्रणीते" इत्यादिना वर्णिततदुत्कर्षानुसन्धानवचनं वा तत्र नास्ति । "प्रकृतिमगान्निति त्वस्तीति तद्बोधभेदः सुज्ञानः । तथा सति यत्र शुद्धपुष्टेरेवाऽज्ञानं तत्र तदसाधारणकारणरूपायाः साक्षा-द्धर्मिपराया मर्य्यादायास्तथा भजनोपयोगितया ज्ञानं नास्ती-त्यनुक्तसिद्धम् । तेन श्रीमदाचार्य्यचरणैरेव केवलैर्यथोक्तदल-द्वयापन्नः शुद्धपुष्टिमार्गो ज्ञातः प्रकटीकृतः शास्त्रतो व्याख्या-तोऽपि । नाऽन्येन तद्दिगप्यनुसंहितेति नैतत्तिरोहितम् ।

तथाच पुष्टपुष्टेः स्वतन्त्राया यत्फलं तदेव स्वमार्गीयमर्याद-याऽपि साक्षाद्धर्मिपरया तदुदयद्वारेति प्रामाणिकत्वसिद्धये पाषण्डित्वाद्यनाप्तये तत्तत्सौकर्य्यौचित्यादिनेऽञ्जसा सिद्धयेऽ-न्यथा तत्फलानुपलब्धिप्रसङ्गपरिहाराय च स्वमार्गीयमर्य्याद-यैव शुद्धपुष्टिमार्गः प्रवर्त्तनीयः । सोऽपि ब्रह्मवादस्थापनपूर्व-कमेव । ब्रह्मवादोऽपि हि प्रमाणतः प्रमेयतः साधनतः फलतश्च धर्म्येव—ब्रह्मैव च केवलं व्यक्तया वाचोपदिशति । तदैव हि स मुख्यतयोपयोगं मुख्यभक्तिमार्गे लभते । नाऽन्यथेति स्वमा-र्गीयमर्य्यादायामेव तत्समावेशः प्रकट इति । न त्ववतारकाल-वत्प्रमाणाद्यनपेक्ष्यैव । तथैव च स प्रवर्त्तितः श्रीमदाचार्य्य-चरणैः । तत्तावद्युक्तमुक्तमेतत् यत्किल—श्रीमदाचार्य्यचरणैः प्रमाणानुरुद्धः प्रमेयमार्गः प्रकटीकृत इति । युक्तश्चैतदप्युक्तं यत्—श्रीमच्छुद्धपुष्टिमार्गाचार्य्यप्रवृत्त्यनुरूपं "वेदाः श्रीकृष्ण-वाक्यानी" ति प्रमाणाङ्गीकारपूर्वकं पुष्टिमार्गस्थापनमिति ।

एष तावच्छ्रीमदाचार्य्यचरणानां शुद्धपुष्टिमार्गस्थापन-प्रकारः सूत्रभाष्यश्रीमत्सुबोधिनीसिद्धान्तमुक्तावलीपुष्टिप्रवाहम-

र्यादाभेदनिरूपणसेवाफलसिद्धान्तरहस्यतत्त्वदीपनिबन्धादिषु प्रस्फुटः । श्रीमत्प्रभुचरणैर्विद्वन्मण्डनभक्तिहंसभक्तिहेतुनिर्णयादौ तत्पुत्रपौत्रैश्च तट्टीकादिषु निष्कृष्टश्च । तदवतरणान्यपि यथा ।

भक्तिहंसे—"एवं सति भक्तिमार्गीयभजनप्रकारेषु स्नेह एव नियामकः स्नेहवताम् । कर्मणि विधिवत् । तद्रहितानां तु तद्वक्तृत उपदेश एव । स च वेदाविरुद्ध एवेति ज्ञेयम् । विधिमजानता बालेन पित्रादिशिक्षया कृतसन्ध्यावन्दनादेः कर्मत्ववदुपदेशानुसारेण कृतेरपि भक्तित्वम् । तन्मार्गीयत्वात् । एवम्भूतस्याऽग्रे स्नेहोऽवश्यम्भावीति ज्ञेयम् । यथा तादृग्बालकृतकर्मणोऽप्युक्तफलसाधकत्वं तथा तादृग्भजनस्याऽपि पुरुषोत्तमप्रापकत्वामिति किमन्यदवशिष्यत" इति श्रीमत्प्रभुचरणाः ।

भक्तितरङ्गिण्याम्—तद्रहितानामिति । स्नेहरहितानां भजने नियुक्तानां कृतिर्वक्तृपुरुषाधीना । स्नेहस्याऽनुदितत्वान्मर्यादयैवोपदेश इत्यर्थ " इति श्रीमद्रघुनाथाः ।

तीर्थे—मर्यादयैवेति । एतेन वेदाविरुद्धपदं व्याख्यातम् । तेन य इदातीन्तनास्तद्विरुद्धमुपादिशन्ति कुर्वन्ति वा ते भ्रान्ता इति सिद्ध्यति । तस्मात्पूर्वेषां रीतिमनुसृत्यैव कार्य्यमि " ति श्रीपुरुषोत्तमाः ।

अपिच । भक्तिहंसे—" नन्वेवं पुरुषोत्तमार्थिप्रवृत्त्यनुपपत्तिः । मैवम् । तदर्थित्वस्यैव वरणकार्य्यत्वात् । अन्यथा तदनुपपत्तेः । वरणे चाऽस्ति प्रकारद्वयम् । मर्यादापुष्टिभेदेन । आद्यस्तु तत्साधने भवति प्रवृत्तः । तथैव तद्वरणात् । परन्तु स्नेहोत्पत्तिपर्य्यन्तं विधिरेव तत्र प्रयोजकः । तदुत्पत्त्यनन्तरञ्च रागादेव तत्सम्बन्धिपदार्थे यतिष्यते इति विधेरप्रयोजकत्वम् । द्वितीयस्य तु

१ कर्मज्ञानभक्तिष्वित्यनुवर्त्तते ।

प्रवृत्त्यप्रवृत्ती अप्रयोजिके। भगवता स्वस्यैव साधनत्वाङ्गीकारात्। अत एव "अह्न्यापृतं निशि शयानमतिश्रमेणेति गोकुलविशेषणं द्वितीयस्कन्धे ब्रह्मणोक्तमिति सर्वमवदातमि" ति।

भक्तितरङ्गिण्याम्—"स्वविषयकवरणास्तित्वानिश्चयात्पुरुषोत्तमभजनं नोपपद्यत इत्याशङ्क्याऽऽह—नन्विति। यदेव वरणकार्य्यं निश्चायकं कारणस्य तस्य पुरुषोत्तमार्थित्वस्य स्फुटमुपलम्भादित्यर्थः। अन्यथेति। कारणमन्तरेण कार्य्योत्पत्तेराकस्मिकत्वञ्चाऽऽपद्येतेति भावः। ननु कुत्रचिद्वरणकार्य्यपुरुषोत्तमार्थित्वं विनाऽपि स्वतः सम्बन्धः पुरुषोत्तमे दृश्यते। तस्य चाऽवश्यं कारणपूर्वकत्वं वाच्यम्। तच्च प्रकृते तदर्थित्वमन्तरेणाऽनुपपन्नमित्यत आहुः—वरणे चेति। साधने प्रवर्त्य तदनुरूपफलदानमा स्नेहोत्पत्तेरिति मर्यादामार्गस्वरूपम्। द्वितीयस्येति। यद्यपि प्रथमेऽपि स्वकृतप्रवृत्त्यप्रवृत्ती स्वरूपसम्बन्धं कर्त्तुं न शक्नुतः। तथाप्यवान्तरकृतिरपि द्वितीये नाऽपेक्षितेति वैलक्षण्यम्। अनुग्रहस्तूभयत्राऽऽप्यादिकारणत्वेन सर्वैरप्यङ्गीकार्य्य एवे" ति।

तीर्थे—"तत्साधन इति। भगवत्प्राप्त्युपायभूतस्नेहोत्पादके साधने। तथैवेति। साधनद्वारैव भक्तिं मां च प्राप्नोत्वितीच्छयेत्यर्थ" इति।

पुष्टपुष्टेः स्वतन्त्राया यत्फलं तदेव स्वमार्गीयमर्य्यादयाऽपि साक्षाद्धर्मिपरयेत्यत्र निरूपितं स्फुटम्।

भक्तिहेतुनिर्णये तु—वरणद्वैविध्यव्युत्पादने निरूप्यमाणा मर्य्यादा धर्मद्वारा धर्मिपरेति ज्ञेयम्। तदिदं तत एवाऽवगन्तव्यम्।

न चैवं मर्यादाया अभ्युपगमे तत्तत्साधनानुष्ठानस्य फलोपयोगित्ववत्तदनाचरणस्याऽन्यथाचरणस्य च कलिकालकृतासा-

१ कर्मज्ञानभक्तिभिरिति शेषः पूर्वानुसन्धानेन लभ्यते।

मर्थ्यबुद्धिदोषादिनोदये फलविघातोऽपीति मर्यादायाः सापायत्वे प्राप्ते मर्यादायां वरणेऽनुग्रहनैर्बल्यं साधनतः फलति । तथैव फले तारतम्याभावे वरणे प्रकारद्वयस्य निष्प्रयोजनत्वापत्त्या फलेऽपि तारतम्यमभ्युपेयमिति भ्रमितव्यम् । स्वमार्गीयमर्यादायाः साधनतः फलतोऽपि साक्षाद्धर्मिपरताया व्यवस्थापनात्साधनानुष्ठानतत्साद्गुण्यवैगुण्यतदभावेषु निष्ठाया एवाऽनुदयेनाऽन्यथा केवलधर्मिपरत्वासिद्ध्या फलविघाततत्तारतम्यादिशङ्कानवसरात् । प्रथमतः प्रविष्टस्य फलतः साधनानां धर्मिपरत्वावधारणेऽपि साधनतो न धर्मिपरत्वावधारणं यद्यपि तथापि तज्ज्ञोपदेशानुसारेण वर्त्तमानस्य सर्वं सूपपन्नमेवेत्यसकृत्समाहितम् । अत्र–“ यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित् । धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह” त्यादि वचनमप्यनुसन्धेयम् । तत एव–“ यदुक्तं तातचरणैः श्रीकृष्णः शरणं मम । तत एवाऽस्ति नैश्चिन्त्यमैहिके पारलौकिके ” “ दुर्भगाऽसि तथापि त्वं मा त्यज स्वप्रियान्तिकम् । कदाचित् कृपया पश्येत्प्रियस्तद्भाग्ययोगत ” इत्यादीनि श्रीमत्प्रभुचरणवचांसि । आत्मसुतेभ्यः पत्रे च श्रीमत्प्रभुचरणाः–“ श्रीगोकुलनाथोऽस्माकमैहिकं पारलौकिकञ्च स्वयमेव जातोऽस्तीति किमस्माकं विचारणीयमस्ती ” त्यलिखन् ।

एवञ्च प्रामाणिकत्वापाषण्डत्वादिपूर्वोक्ततत्तत्सकलप्रयोजनसिद्धये–“ श्रुतिस्मृती ममैवाऽऽज्ञे यस्ते उलंघ्य वर्त्तते । आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णव ” इति वचनेन “ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते । न मे पार्थाऽस्ति कर्त्तव्यं त्रिषु लोकेषु किंचन । नाऽनवाप्तमवाप्तव्यं वर्त्त एव च कर्माणि । यदि ह्यहं न वर्त्तेयं जातु कर्मण्यतन्द्रितः । मम वर्त्माऽनुवर्त्तन्ते मनुष्याः पार्थ सर्वशः ।

उत्सीदेयुरिमे लोका न कुर्य्यां कर्म चेदहम् । संकरस्य च कर्त्ता स्यामुपहन्यामिमाः प्रजाः । सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत । कुर्य्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम् । न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् । जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् । प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहंकारविमूढात्मा कर्त्ताऽहमिति मन्यते । तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः । गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते । प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु । तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत् । मयि सर्वाणि कर्माणि संन्यस्याऽध्यात्मचेतसा । निराशीर्निर्ममो भूत्वा युद्ध्यस्व विगतज्वरः । ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः । श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः । ये त्वेतदभ्यसूयन्तो नाऽनुतिष्ठन्ति मे मतम् । सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ” इति श्रीमद्भगवद्गीतातृतीयाध्यायप्रघट्टकोक्तरीत्या यथाभगवदिष्टमनाग्रहेणाऽनास्थया च केवलं धर्म्यनुसन्धानेन स्नेहवतां तदुपदेशानुसारेण वर्त्तमानानाञ्च यथाशक्ति साधनानुष्ठानं न साधनसापेक्षत्वेनेति स्पष्टमेतत् । तत एव “ लौकिकत्वं वैदिकत्वं कापट्यात्तेषु नाऽन्यथा । वैष्णवत्वं हि सहजं ततोऽन्यत्र विपर्य्यय ” इति पुष्टिस्थानां लक्षणमुक्तम् ।

सर्वथा सर्वसाधनराहित्यप्रकारकं तु वरणं प्रादुर्भावसामयिकलीलास्थानामेवेति “ अहल्यापूतं निशि शयानमतिश्रमेणे ”-त्यादिवचनैरेव स्फुटम् । किञ्च । व्रजस्थानां पुष्टिस्थितौ यः प्रकारः “ ते नाऽधीतश्रुतिगणा ” इत्यादिना निरूपितः स एवेदानीन्तनानामिति तु स्वमार्गमर्माविदुषां परमो व्यामोहः । क्वचित्पाण्डित्यश्लोके व्रजस्थानां स्वमार्गमुख्यैकदेशित्वनिर्धारणात् ।

तेनेदानीं पाण्डित्यादिक्रमेणैव व्रजपतिरतिमार्गस्थापनमिति द्रष्टव्यम् ।

एवञ्च स्वमार्गीयमर्यादायाः पुष्टिपुष्टितत्फलप्रापकत्वात्फले भेदाभावेन स्वयञ्च सा पुष्टिपुष्टिरूपैवेत्यवतारानवतारकालाभ्यां तल्लाभे प्रकारभेदो न वस्त्वन्यथयतीति स्वमार्गीयमर्य्यादायाः साक्षाच्छुद्धपुष्टिमार्गरूपायाः सर्वथैव न प्रमदितव्यं श्रीमदाचार्य्यचरणानुगृहीतेन पुष्टिस्थेन जनेनेत्यनुसन्धीयतामेतत्सुधीभिः ।

तत एव श्रीमत्प्रभुचरणानां पद्यम्—

"श्रीवल्लभाचार्य्यमते फलं त-
त्प्राकट्यमत्राऽव्यभिचारिहेतुः ।
प्रेमैव तस्मिन्नवधोक्तभक्ति-
स्तत्रोपयोगोऽखिलसाधनानामि"ति ॥

तस्माच्छ्रीमदाचार्य्यचरणैः पुष्टिपुष्टिमार्गस्थापनाय प्रमाणानुरुद्धः प्रमेयमार्गः प्रकटीकृत इत्यतिरोहितम् । तेन तदीयैस्तदनुसरणेनैव पुष्टिपुष्टिः सम्पाद्यताम् । नान्यथेदानीं सा शक्यसम्पादनेति नैतद्विस्मर्त्तव्यं सज्जनैः ।

ननु भोः "न रोधयती" त्यादिना "नियमा यमा" इत्यन्तेन स्वप्राप्तिं प्रति साधनानि प्रतिषिध्य "यथाऽवरुन्धे सत्सङ्ग" इत्यादिना "सत्सङ्गान्मामुपागता" इत्यन्तेन सत्सङ्गस्य स्वप्रापकत्वमुक्त्वा "केवलेन हि भावेने" त्यादिना "सङ्गाच्छतसहस्रश" इत्यन्तेन मुख्यं महद्भिर्मृग्यं भक्तियोगं कथयित्वा स्वस्य केवलभक्तियोगसुलभत्वेन तदितरसाधनकोटिभिरप्यशक्यलाभत्वेन च स्वप्राप्तये साधनत्यागपूर्वकं सर्वात्मभावप्रकारकं स्वशरणगमनमाह भगवान् । तेनैव साम्प्रतिकाः प्रवेशमात्रेण साधनत्यागमिच्छन्ति । किमत्राऽयुक्तम् ? नन्विद-

मेवाऽयुक्तं यदुत प्रवेशमात्रेण साधनत्यागः । तथाहि । इह तावत् सर्वात्मभावेन शरणगमने पूर्वाङ्गतया साधनत्याग उच्यते । सर्वात्मभावस्तु—सर्वोऽप्यात्मनो भावः । भगवत्स्वरूपातिरिक्तास्फूर्त्तिरिति यावत् । यत्र यथावद्रुचेरपि नेक्ष्यत उदयस्तत्र का चर्चा सर्वात्मभावस्य । सति सर्वात्मभावे—"न क्रोधो न च मात्सर्य्यं न लोभो नाऽशुभा मतिः । भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे" "त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्ते पुरुषस्य शक्र । ततोऽनुमेयो भगवत्प्रसादो यो दुर्लभोऽकिञ्चनगोचरोऽन्यैः" "पुंसां किलैकान्तधियां स्वकानां याः सम्पदो दिवि भूमौ रसायाम् । न राति यद्द्वेष उद्वेग आधिर्मदः कलिर्व्यसनं संप्रयास" इत्यादिवचनविरुद्धाचरणं तेषु नोदियात् । यत्र "त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः । कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेदि" ति मर्य्यादायामपि कामक्रोधादेरसम्भवः । तत्र पुष्टौ तत्रापि च निरोधचरमावस्थायां भगवत्प्राप्तेरव्यवहितपूर्ववर्त्तिन्यां फलदशायां प्रपञ्चप्रलये कामक्रोधादेः सर्वथा स्फुरितुमप्यनवसरात् । आरम्भदशायामपि—"नष्टप्रायेष्वभद्रेषु नित्यं भागवतसेवया । भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी" त्यादिभिः कामक्रोधादेर्नाशस्याऽऽवश्यकत्वोक्तेः । "अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे" इति श्रीमद्भागवतीयेन वचनेन सर्वानर्थप्रत्यनीकतया पुष्टिभक्तेर्भक्तिहंसे निरूपणाच्च । सर्वात्मभावश्च न स्वकृतिसाध्यः । ननु मैवम् ! "तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनामि" त्यादिना चोदनादेस्त्यागमुक्त्वा सर्वात्मभावप्रकारकशरणगमनोपदेशेन चोदनादेस्त्यागस्य सर्वात्मभावतत्पूर्वकशरणगमनं प्रति कारणत्वं गम्यते । तेन स्वकृतिसाध्यत्वञ्चाऽऽपद्यते । तथा सति सर्वमर्यादोल्लङ्घनं कृत्वाऽ-

वस्थानं साम्प्रदायिकानां न दुष्यति । प्रत्युताऽनयैव रीत्या सर्वात्मभावस्य निष्पत्तेरावश्यकमपीति चेत्? अहो नु खलु भोः!!! स्वभावरक्तस्य महान् व्यतिक्रमः। उत्सृज्येति ल्यपा तत्त्यागपूर्वकत्वमेव सर्वात्मभावेन शरणगमनस्याऽऽयाति । न तु त्यागहेतुकत्वमपि। मानाभावात्। भुक्त्वा गच्छतीत्यत्र भोजनपूर्वकत्वमेव गमनस्य । न तु भोजनहेतुकत्वमितिवत्। क्रमाद्यनुदयेन भोजनस्योपकारकत्ववत्सर्वात्मभावस्वरूपसंरक्षणाय साधनत्यागस्याऽऽवश्यकत्वेनाऽङ्गत्वं तु न निवार्य्यते । तेनाऽङ्गविधित्वमप्यस्तु । सर्वात्मभावस्य तद्धेतुकत्वाङ्गीकारे तु तत्त्यागस्य तदङ्गत्वाभावात्स्वातन्त्र्येण, स्वतन्त्ररीत्या विहितत्वमपेक्षितं स्यात्। तच्च सर्वमर्यादोल्लङ्घनेन सर्वात्मभावकामो यतेतेत्याकारकम् । "ज्योतिष्टोमेन स्वर्गकामो यजेते" तिवत्। ननूत्सृज्येति स्वतन्त्र एव विधिरस्तु ? तथा सति वाक्यभेदापत्तिः। तस्मात्सर्वात्मभावस्य साधनत्यागसाध्यत्वं न सिद्ध्यति। येन तत्त्यागस्तदर्थं तत्पूर्वं कर्त्तव्यः स्यात् । किन्तु शरणगमने सर्वात्मभावः प्रकारः। तथैव चोदनादेस्त्यागोऽपि सर्वात्मभावविशिष्टशरणगमने । तेन तादृशशरणगमनप्रकारतयैव त्यागः कर्त्तव्य इति सिद्ध्यति। तत्प्रकारतया त्यागस्तु सर्वात्मभावेन शरणगमने सति भवेत्। सर्वात्मभावस्यैवाऽनुदये तादृशी शरणागतिस्तत्प्रकारतया साधनत्यागश्च दूरापास्तावेव । किंसाध्यस्तर्हि सर्वात्मभावः ? भगवत्कृत्येकसाध्यः। तद्विचारितं "प्रदानवदेव तदुक्तमि" त्यधिकरणे श्रीमत्कृष्णद्वैपायनैः । तद्भाष्यं यथा—"अथेदं विचार्य्यते । सर्वात्मभावो विहितकर्मज्ञानभक्तिसाध्यो नवेति । तत्र पुराणे—तस्मात्त्वमुद्धवोत्सृज्येत्युपक्रम्य मामेकमेव शरणमात्मानं सर्वदेहिनाम् । याहि सर्वात्मभावेन यास्यसे ह्यकुतोभयमिति वाक्ये मुक्त्यात्मका-

कुतोभयसाधनरूपशरणगमने प्रकारत्वेन सर्वात्मभावस्य कथनेन स्वप्रयत्नसाध्यत्वं गम्यते । अतः साधनसाध्य इति पूर्वः पक्षः । तत्र सिद्धान्तं वक्तुं तदुपदेशस्वरूपमाह । प्रदानवदिति । यद्ययं साधनोपदेशः स्यात् । स्यात् तदा साधनत्वेन सर्वात्मभावेन शरणप्राप्तेः स्वकृतिसाध्यत्वम् । न त्वेवम् । किन्तु तदुक्तं भगवदुक्तम् । प्रदानवत् । प्रकृष्टं दानं वरदानमिति यावत् । तद्व-देवेत्यर्थः । वरेण हि स्वकृत्यसाध्यमपि सिद्धयतीति । तथा शत्रु-संहारभयादिनाऽपि शरणाप्तिर्भवति । तत्र न तस्याः पुरुषार्थत्वं किन्तु तन्निवृत्तेरेव । प्रकृतेऽपि सर्वात्मभावे स्वरूपप्राप्तिविल-म्बासहिष्णुत्वेनाऽत्यार्त्या स्वरूपातिरिक्तास्फूर्त्या तद्भावस्वा-भाव्येन गुणगानादिसाधनेषु कृतेष्वप्यप्राप्तौ स्वाशक्यत्वं ज्ञात्वा प्रभुमेव शरणं गच्छति । एतच्च न स्वकृतिसाध्यमिति सुष्ठूक्तं प्रदानवदिति । भक्तस्येप्सितोऽर्थो हि वरो भवति । सर्वात्म-भावस्याऽनुभवैकवेद्यत्वेन पूर्वमज्ञानेनेप्सितत्वासम्भवेऽपि स्वत एव कृपया दानमिति प्रदानवदित्युक्तम् । अथवा । सर्वात्म-भावेन मां याहीति सम्बन्धः । यद्वा । प्रदानवदित्यस्य पूर्वव-देव व्याकृतिः । तत्र साधनासाध्यत्वे प्रमाणमाह । तदुक्तमिति । नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्य इति श्रुत्या वरणातिरिक्तसाधनाप्राप्यत्वमुच्यत इति तत्तथैवेत्यर्थः । भगवदुक्ताकुतोभयपदस्य न मुक्तिरर्थः । किन्तु यतो वाच इत्यादिनाऽऽनन्दस्य स्वरूपमुक्त्वाऽऽनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति श्रुत्युक्तं यत्पूर्वोक्तं रसा-त्मकपुरुषोत्तमभजनानन्दानुभवोत्तरकालीनमकुतोभयं तदर्थ" इति । तथाच राजभोजनप्रसङ्गे संवृतद्वारतया प्रवेशानिराशस्य पामरस्य राजैव दयातिशयात् द्वारं विवार्य्य स्वयं प्रेरयत्यन्तर्या हि राजभोजनं लप्स्यस इति । तत्र यथा न पामरकृतिसाध्यत्व-

मंशतोऽप्यनुसन्धातुमवसरः । तथैव साक्षात् स्वरूपं विवार्य्याऽवस्थितो भगवान् तथा त्यागपूर्वकसर्वात्मभावप्रकारकशरणगमनं मयि कुर्वकुतोभयं प्राप्यसीति श्रीमदुद्धवानुपदिशति । तत्र स्वव्यापारस्य स्पर्शाभावेन साधनसाध्यत्वधीः सर्वथाऽनवसरपराहतैव ।

ननु भगवत्कृत्यैकसाध्यत्वायैव तत्त्यागो न तु त्यागत्वेन तत्र साधनताऽस्तीति चेन्मैवम् । तदर्थं त्यागे त्यागत्वेन कारणता नास्तीति वचनस्य बाधितत्वात् । वस्तुतो भगवत्कृत्येकसाध्यत्वेनैव त्यागस्य कृतिः । न स्वकृतिसाध्यत्वेन । यतो भगवत्कृत्येकसाध्यत्वाय त्यागः स्यात् । भगवत्कृत्येकसाध्यत्वेन त्यागस्तु नाऽधिकारिसामान्यनियतः । किन्तर्ह्यधिकारिविशेषैकनियतः । अनधिकारिणस्तु "विनश्यत्याचरन्मौढ्याद्यथा रुद्रोऽब्धिजं विषमि" ति वाक्यान्नाश एव । ननु कृपैवाऽधिकारः ? आम् ! "कृपा च मार्गरुच्या निश्चीयत" इति श्रीमदाचार्य्यचरणा आहुः । मार्गरुचिश्च दाम्भिकेष्वपि दरीदृश्यते । दाम्भिकत्वादि तु लोभाद्यनर्थवत्तया सूह्नेयम् । तदेव श्रीहरिरायैर्दुस्सङ्गविज्ञानग्रन्थे निरूपितम् । तत एव गुरुलक्षणे—"दम्भादिरहितमि" त्याहुः श्रीमदाचार्य्यचरणाः । ततश्च दम्भादिराहित्यग्राहितयाथार्थ्या मार्गरुचिश्चेत्कृपोन्नेया । तया च त्यागाधिकारः । कामक्रोधलोभादिभिरभिभूतस्य प्रभुसेवाविमुखस्य मार्गरुचिचोदनात्यागौ तु पाषण्डपर्य्यवसन्नः केवल आडम्बरः । किञ्च । कृपाऽधिकार इति युक्तम् । नतु मार्गोन्मुखीकरणमात्रोपक्षीणा सा त्यागाधिकाराय । किन्तु फलोन्मुखीति तु निर्मत्सरेण मनसा न हीयताम् । अपि च । निबन्धे—"भक्तिनिष्ठा तदा ज्ञेया यदा कृष्णः प्रसीदति । निष्ठाभावे फलं तस्मान्नास्त्येवेति विनिश्चयः । निष्ठा च साधनैरेव न मनोरथ-

वार्त्तये" त्यूचे श्रीमदाचार्य्यचरणैः । प्रसादो नाम मर्यादांशत्याजनपूर्वकशुद्धपुष्टिप्रवेशेन यत् स्वस्वरूपानन्दानुभावनं तत् । तच्चेहाऽकुतोभयलाभरूपम् । स कदा सम्भवति । यदा भक्तिनिष्ठा । "महताऽपि बाधकेनाऽचलनं निष्ठे" ति प्रथमस्य द्वितीये "नष्टप्रायेष्वि" त्यत्र श्रीमदाचार्य्यचरणाः । सा च पर्य्यवसानतः सर्वात्मभावादिरूपैव । तदभावे फलं नास्त्येवेत्याहुः—निष्ठाभावे फलमित्यादिना । प्रत्युताऽपराधोऽप्यन्यथा करणेनेति ज्ञेयम् । ननु निष्ठोदयः केनेत्याकाङ्क्षायामाहुः—निष्ठा च साधनैरेवेति । तान्युक्तानि—"शुश्रूषोः श्रद्दधानस्ये"-त्यादिना "भक्तिर्भवति नैष्ठिकी" त्यन्तेन प्रथमस्य द्वितीये । महद्भिर्मृग्यभक्तियोगोपयोगीनि च साक्षाद्भगवदुक्तानि मुख्यानि तान्युपन्यस्तानि । तेषां साधनता न साधनतेति च भूर्य्युपपादितम् । "प्रदानवदेव तदुक्तमि" ति न्यायादपि न सा । ननु साध्यभक्तियोगवत्साधनभक्तियोगस्याऽपि केवलभगवदधीनत्वे तुल्ययोगक्षेमत्वमुभयोरिति चेत्? आ एवं किलैतत् । तथापि विशेषोऽस्ति । साधने पुरुषव्यापारस्य प्रवृत्तेः । तथाच स्वमार्गीयायां साक्षाद्धर्मिपरायां मर्यादायां या प्रवृत्तिः सा न स्वकृतिसाध्या । किन्तु प्रदानवदेव भगवद्दत्तैव लभ्यते । तेन तत्प्रवृत्त्या तादृशो निरङ्कुशो भगवदनुग्रहोऽनुमेयो यद्यपि । तावता महद्भिर्मृग्यभक्तियोगत्वसिद्धिश्च तत्र भवत्येव । तथापि तत्र पुरुषव्यापारः । साधनत्वात् । फले तु न तथेतीहैष विशेषः । फलात्मकश्चाऽयं त्यागः । तत्र पुरुषव्यापारप्रवृत्तिरेव न भवतीति तदाग्रहं स्वसम्प्रदायानवबोधमूलं विधूय साक्षान्मुख्यपुष्टिरूपैव स्वमार्गीया मर्य्यादा पुष्टिस्थितैरनुस्त्रियतां नोपेक्ष्यतामित्यभिव्यक्तमेतत् ।

भक्तिहंसेऽप्येतन्निरूपितम् । तद्यथा—“प्रेम्णश्च फलत्वेन स्वकृत्यसाध्यत्वेन च न विहितत्वं सम्भवति। किन्तु तस्याऽनुवाद एव । य एतस्मिन् महाभागाः प्रीतिं कुर्वन्ति मानवाः। माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः । स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चाऽन्यथा। तृतीयस्कन्धे च—देवानां गुणलिङ्गानामानुश्रविककर्मणामित्यादि । मद्गुणश्रुतिमात्रेणेत्यादि । साधनरूपा श्रवणादिलक्षणा तु—तस्माद्भारत सर्वात्मा भगवान् हरिरीश्वरः । श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यश्चेच्छताऽमयमित्यादिवाक्यैर्विधीयत एवेति सर्वमनवद्यमिति दिक्” इति।

इयञ्चेह भक्तितरङ्गिणी—“प्रेम्णश्चेति । स्वःपदास्पदीभूतसुखसाधने यथा पुरुषव्यापारस्तथाऽत्रापीति भावः । स्नेहरूपायाः फलत्वेनाऽविधेयत्वं साधनरूपायाः श्रवणाद्यात्मकत्वेन विधेयत्वमिति विवेको य एतस्मिन्नित्यादिना ज्ञापित” इति।

विद्वन्मण्डनेऽप्येतत्सनिदर्शनमुपपादितम् । तथाहि । “सच चिरकालोप्तसमुदितप्राचीननिरतिशयकृपाफलसारनिरुपाधिनिज चरणकमलानुरागविलासाभिलाषबीजासु ततो निजपरिजननिरोधतः प्रियावलोकननिमित्तं कृतप्रतिक्षणविविधव्याजजनितगतागतकर्षितासु ततो दिवा प्रियवनगमनजनितविरहतरणितापतप्यमानान्तःकरणकेदारासु ततो निशामुखे प्रियागमनसम्पन्नेष्टावलोकनसेचनजनितहसितवलितविवशतरलरुचिरविलोचनयुगलविहिताविविधनिरवधिरसभावाङ्कुरासु ततोऽतिविपुलकलिन्दजापुलिननभोवलयगतनिजमुरलिकाकलनिनदगर्जितानन्दितास्वेव कासुचिद् भूमिषु श्रीमन्नन्दराजकुमारो नवजलदो निजानन्दसुधां ववर्षेति तथैव सर्वत्र वर्षिष्यतीति न ज्ञातुं शक्यते। अतो मर्यादया तद्भजनमेव सर्वेषां कर्त्तव्यत्वेन स्थितम्। तेनैव सर्वमिति दिक्” इति।

इहेदं सुवर्णसूत्रम्—" अतिशयितानुग्रहमात्रसाध्यतामुदाहरणप्रदर्शनेन स्फुटीकुर्वन्ति—स चेत्यादि । अत्र रामेण सार्द्धमित्यादीनि वाक्यान्येवंविधानीतराण्यपि प्रमाणत्वेनाऽनुसन्धेयानि । स्थितमिति । सूत्रादौ निर्णीतम् । तर्ह्यनुग्रहविशेषेप्सोः का गतिरित्यत्राऽऽहुः—तेनेत्यादि । बीजसत्तायामेतदेवाऽङ्कुरसाधनम् । अग्निकुमारादिभिस्तथैव कृतत्वादित्यर्थः " इति ।

एषा चेह हरितोषिणी—" कासुचिदित्यनेन बाहुल्याभावः सूचितः । अत एव ज्ञानमार्गेऽपि श्रीभगवता गीतायामुक्तं कश्चिन्मां वेत्ति तत्त्वत इति । ननु सर्वत्र वर्षिष्यतीत्यनेन साधनं विनैवेदं भगवत्कृतकृपया भविष्यतीति ज्ञायते । अत एव निःसाधनफलात्माऽयं प्रादुर्भूतोऽस्ति गोकुले इति निबन्धोक्तं सङ्गच्छते । एवं सति साधने यत्नो न कर्त्तव्य इत्यायातमित्यत आहुः—मर्यादयेति । स्थितमिति । सर्वत्र सूत्रे भाष्ये चोक्तमित्यर्थः । तेनैवेति । एवकारेण तदतिरिक्तं साधनं नास्तीति सूचितमि " ति ।

ननु श्रीमदाचार्य्यचरणकृपाबलमेव केवलं पुष्टिस्थानां प्रबलं विश्वासबीजम् । तेन प्रदानवदेव पुष्टिमार्गस्थितिर्जीवस्य । तदेकानुग्रहाधीना हि सा । तथाच तत्कृपाबलेन चोदनादित्यागोऽस्माकमस्त्विति चेत्? भद्र ! किमत्र नवीनमुल्लिखसि । तथैव हि वस्तुस्थितिः । निःसाधनफलात्मकस्य केवलभावात्मकस्य शुद्धपुष्टिमार्गस्य प्रवर्त्तनायोद्युक्तानां श्रीमदाचार्य्यचरणानां सम्प्रदाये फलदशापन्नमहद्भिमृग्यभक्तियोगशालिनामेवाऽतिशय आवश्यकः फलार्थमेव मार्गप्रवृत्तिरिति । ततश्च तादृशफलाभिलाषोपजननाय फलस्वरूपादिविवेचनपरस्तद्विचारोऽपि भूयानेवाऽपेक्षितः । अन्यथाऽन्यत्रोत्कर्षबुद्ध्युदयेन तत्राऽप्रवृत्तिः सुलभेति । एवञ्च फलानुभवोपकार्य्यङ्गं चोदनादित्यागोऽपि तेषु नूनमावश्यक

एव । कस्तावत्प्रमूढस्तं तादृशं प्रतिषेधतु । श्रीमदाचार्य्यचरण-करुणातारुण्यमेव च सर्वत्राऽत्र मूलम् । नचैतावता मार्ग-रुचेरपि यथावदनुद्बोधे तादृशफलशालिनामनुसरणेनाऽन्येषु तत्त्यागः फलाद्भ्रंशको न भवति । तस्माद्यथाशास्त्रमेव वर्त्ति-तव्यं फलेप्सुभिः । न मनोरथवार्त्तया फलसिद्धिः । किन्तु विनाश एवोच्छास्त्रत्वकृत इति नैतद्विस्मार्य्यम् । ननु श्रीमदा-चार्य्यचरणकरुणाबलविश्वासेन न विनश्यति ? न विनश्यति । तथापि कोयं विश्वासप्रकारो येन तदुक्तावश्रद्धा तत्करुणा-बले च निर्भरत्वमिति । तदिदं महदेव शाठ्यं नाऽनुगतत्वरूपं भक्तत्वं यदुत कथनाननुष्ठानम् । तत्रापि विरुद्धाचरणम् । तथापि स्वोद्धाराय तेष्वेव दूषणैकसब्रह्मचारी विश्वासोऽपि । वस्तुतो विश्वासकथनाऽम्बरेण मुग्धान् व्यामोह्य पाषण्डप्रवर्त्त-नार्थमेवाऽयं धर्मध्वजित्वपर्य्यवसन्नो वाचःपेशो न तु तादृश-विश्वासे सति तरणितारुण्ये तिमिरस्येव सकलमर्यादोच्छेदेन स्वैराचारस्यांऽशतोऽपि सर्वथा सम्भवो यतः । तत्साधूक्तं श्रीमदाचार्य्यचरणैः—निष्ठा च साधनैरेव न मनोरथवार्त्तयेति । श्रीमत्प्रभुचरणाश्च विज्ञप्तिष्वाहुः—"शास्त्रं नियामकं तावद्या-वत्पूर्णा कृपा न ते । कृपया ते सुपूर्णस्य नैव कोपि नियामक" इति । पूर्णा कृपा च पूर्णमार्गरुच्या निश्चेया । एवं सति भग-वता च तत्प्रकटितैः श्रीमदाचार्य्यचरणैश्च दर्शितया सरण्या पूर्णा कृपा यावद्भवति तावत्तदन्यथाऽऽचरणं चोदनादित्याग-रूपं दोषायैवेति । तदुक्तं श्रीगीतासु—"यः शास्त्रविधिमुत्सृज्य वर्त्तते कामकारतः । न स सिद्धिमवाप्नोति न सुखं न परां गतिम् । तस्माच्छास्त्रं प्रमाणं ते कार्य्याकार्य्यव्यवस्थितौ । ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्त्तुमिहाऽर्हसी" ति षोडशे । पुरुषोत्तमक्षेत्रस्थितः श्रीहरिः श्रीजगन्नाथोऽपि—"एकं शास्त्रं

देवकीपुत्रगीतमेको देवो देवकीपुत्र एव । मन्त्रोऽप्येकस्तस्य नामानि यानि कर्माऽप्येकं तस्य देवस्य सेवे" ति प्राह। सङ्कलितं तदर्थमाहुर्निबन्धशास्त्रार्थे श्रीमदाचार्य्यचरणाः— "शास्त्रमवगत्य मनोवाग्देहैः कृष्णः सेव्य इत्यर्थ" इति। शास्त्रं भगवद्गीता। तत एव "वेदाः श्रीकृष्णवाक्यानी" ति श्रीमदाचार्य्यचरणानां प्रमाणाङ्गीकारः। तत एव च "कृष्ण-वाक्यानुसारेण शास्त्रार्थं ये वदन्ति हि। ते हि भागवताः प्रोक्ताः शुद्धास्ते ब्रह्मवादिन" इति तदाग्रहवचनम्। "वेदमार्ग-विरोधेन येषां करणमण्वपि। ते हि पाषण्डिनो ज्ञेयाः शास्त्रा-र्थत्वेन वेषिण" इत्यप्याहुः सर्वनिर्णये श्रीमदाचार्य्यचरणाः। स्वप्रकटिते साक्षान्मुख्यपुष्टिमार्गे तु शास्त्रविरोधो न प्रसरावसरं लभत इति चापि कण्ठरवेणैवाऽऽहुः श्रीमदाचार्य्यचरणाः— "विरुद्धकरणं नास्ति प्रक्रिया न विरुद्धचत" इति। तस्माच्छ्रीमदाचार्य्यचरणैः प्रमाणानुरुद्ध एव प्रमेयमार्गः प्रकटीकृत इत्यत्र नाऽवशिष्यत इदानीं स्तोकोऽपि सन्देह इत्येतत्स्फुटम्। प्रमेयबलेन तथाप्युद्धारावश्यकत्वाग्रहे तु भवतू-द्धारस्तेषामसुरादीनामिव। न तु भक्तानामिव तेषां सोऽस्ति। नापि मुख्यं फलम्। तस्याऽप्याग्रहे तु तदनुवर्त्तनादिनाऽन्येषु तदनुसरणादिना च तदनुगतेषु पाषण्डोदये सर्वस्याऽप्युद्धा-राङ्गीकारापत्तिः। न चेष्टापत्तिः। तथा सति हा हन्त महती प्रबलेयमनवस्था श्रीमदाचार्य्यचरणप्रयासविप्लाविका मूलोच्छे-दिनी सन्मार्गप्रमोषिणी पाषण्डताण्डविनी समस्तप्रतिष्ठोच्छ्रय-सर्वङ्कषा राजनिग्रहादिप्रसङ्गेन सम्प्रदायप्रसिद्धिप्रलयङ्करी चापि प्रसज्जति। हा धिक्। कष्टम्। कष्टम्। वस्तुतस्तु पुष्टिपाष-ण्डिनामेषामुद्धारस्य का कथा। प्रत्युत सम्प्रदायविरोधेन प्रमेयविरुद्धतया परमोऽधोऽधः पात एवेति विशदमेतत्सुधियाम्।

अत्रैतत्सिद्धम् । मुख्यभक्तिमार्गे तथा तथा निरूपितोपयोगो ब्रह्मवादः शुद्धपुष्टितत्फलप्रापिका साक्षाद्धर्मिपरा साक्षान्मुख्यपुष्टिमार्गरूपा स्वमार्गीया स्वेतरसर्वविलक्षणा मर्यादा तथैव तत्फलरूपा पुष्टिपुष्टिश्चेति त्रितयमखण्ड एकः पुष्टिमार्गः । न त्वत्र वस्त्वन्तरमस्ति । नाप्यत्र तारतम्यमपि सगुणनिर्गुणत्वादिरूपं वा साधनसाध्यत्वतदसाध्यत्वरूपं वा प्रमाणोपपन्नत्वतदभावरूपं वा प्राप्नोति । किन्तु तादृशातिशयितानुग्रहैकसाध्यफलोपलब्धिहेतवे ब्रह्मवादसाक्षाद्धर्मिपरमर्यादयोः साक्षात्तादृशानुग्रहैकाधीनस्थितिकतयैव तादृशेऽधिकारिविशेषे प्रमाणैः समुदयनिर्णयात्तत्त्रितयमेकरूपमेव । एकत्वत एवैवंविधात्--" साकारब्रह्मवादैकस्थापक " इत्यत्रैकपदस्य तदितरव्यावर्त्तनपरत्वेन साकारब्रह्मवादपदत एव फलात्मकपुष्टिमार्गमपि सङ्गृह्याऽभिदधुः श्रीमत्प्रभुचरणाः । एवञ्च साकारब्रह्मवादः पुष्टिमार्गश्चेति पर्य्यायाभ्यां पदाभ्यामेकस्यैव वस्तुनो व्यपदेशः । न वस्त्वन्तराभिलापः । साक्षाद्धर्मिपरा च मर्य्यादा साक्षान्मुख्यपुष्टिमार्गरूपेति साकारब्रह्मवादपदेनैव तदभिधानमपि । साकारब्रह्मवादश्चैवंविधो नाऽन्यरूप इति सोपि साक्षान्मुख्यपुष्टिमार्गरूप एव । ततश्च तथा तथा विशकलनेन तदुपपादनं साधनफलरूपत्वादिविशेषावबोधद्वारा बालव्युत्पादनैकप्रयोजनम् । न त्वेतावता ब्रह्मवादसाक्षाद्धर्मिपरमर्य्यादयोर्भिन्नार्थत्वमास्थाय पुष्टिपुष्टेः प्राप्त्यभिलाषसम्भ्रमरभसेन तत्परित्यागः श्रीमदाचार्य्यचरणसिद्धान्तबहिर्भूतः सर्वथैव फलोपघातकः स्वप्नेऽपि कर्त्तव्यतयाऽनुसन्धेयः । एवमेव हि श्रीमदाचार्य्यचरणसिद्धान्ते "मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवे" ति न्यायेन सकलशास्त्रसमन्वयः सिद्ध्यति । तेनैव तन्मतस्य प्रामाणिकत्वापाषण्डत्वादिसिद्ध्या सकलस्य श्रेयो-

र्थिनो जनस्य तत्राऽऽदरः सिद्ध्यति । तथाच निरस्तसमस्तसंशयप्रसरसम्भवं निर्णुन्ननिखिलावद्यं सकलकल्याणगुणगणोत्तरं ब्रह्मेशानादिभिरप्याशास्यप्रवेशोत्सवं सर्वनिर्मत्सरविद्वद्वर्गरसनीयरससन्दोहैकरससर्वस्वं समस्तसन्मतमौलिलालितप्रशस्तिशासनञ्च सूर्य्यसहस्रनिर्मञ्छनीयविद्योतमभिविद्योततेतमां श्रीमदाचार्य्यचरणसम्मतं मतं दिगन्तरेष्विति तदनुसरणमेवाऽऽवश्यकं विदुषाम् । भूषणञ्चाऽपि तेषां तदेव । तत एव हि जगतां मङ्गलमिति । अन्यथा तु—"अयमेव महामोहो हीदमेव प्रतारणम् । यत्कृष्णं न भजेत्प्राज्ञः शास्त्राभ्यासपरः कृती" ति श्रीमदाचार्य्यचरणवचनेन तद्वैदुष्यवैयर्थ्यजनितो दुष्प्रसह एव तेषां तदनुगानाञ्च खेदः । तस्मादसम्भावनाविपरीतभावनाद्युत्साद्य पाषण्डिनामसद्वादाननुसन्धाय तादृशपुष्टिपथप्रणयोदयकृतार्थितजीवनैरेव भवितव्यं विद्वज्जनैः । भ्रान्तैश्च भ्रमाद्युज्झित्वा श्रीमदाचार्य्यचरणैकशरणैस्तदुपदेशैकपीयूषपायिभिः स्वपथादप्रमाद्यद्भिर्वर्त्तितव्यम् । न तु त्यागाद्युत्पथप्रवृत्त्या मार्गप्रमोषोऽनधिकारपराहतैरुपस्थाप्य इति ।

निजैः पितृपादैः श्रीमदाचार्य्यचरणैः प्रकटितोऽयमेवेत्थम्भूत एव च स्वसिद्धान्तः श्रीमत्प्रभुचरणैः प्रकाशितः । स एव च श्रीमद्गोकुलाधीशैस्तत्सुतरत्नैर्विशदितः ।

एष पुनर्विशेषः । श्रीमदाचार्य्यचरणेषु "आचिनोति च शास्त्रार्थानाचारे स्थापयत्यपि । स्वयमाचरते यस्तु तमाचार्य्यं प्रचक्षत" इति वचनेन शास्त्रार्थाचयनं परमावश्यकम् । शास्त्रार्थाचयनञ्च साध्यसाधनेतिकर्त्तव्यतोपदेशरूपसकलशास्त्रार्थव्यवस्थापनपूर्वकं सपरिकरतन्मुख्यार्थनिर्धारणम् । तच्च व्यासप्रवृत्तिमनुसृत्य तत्तत्त्वसूत्रसमाधिभाषयोर्व्याख्यानेन समस्तसंशयनिरसनपुरस्सरं वेदार्थं निर्धार्य्य "अधुना ह्यधिकारास्तु सर्व एव

गताः कलौ । कृष्णश्चेत्सेव्यते भक्त्या कलिस्तस्य फलाय हि । सर्वेषां वेदवाक्यानां भगवद्वचसामपि । श्रौतोऽर्थो ह्ययमेव स्यादन्यः कल्प्यो मतान्तरैरि''ति कृष्णसेवासिद्धान्तं प्रकाशयद्भिः साधितं श्रीमदाचार्य्यचरणैः । तत्र च शास्त्रीयतत्तदर्थव्यवस्थापनप्रसङ्गे सत्फलमात्रं प्रति हेतुत्वमनुग्रहस्य व्यवस्थापितम् । सर्वासां सर्गादिलीलानां पुष्टिरूपत्वमपि "सर्वा लीलाः पुष्टिमध्ये प्रविशन्तीति मे मतिरि''त्यादिभिर्निरणायि । शुद्धपुष्टिरूपञ्च साधनतः फलतश्च स्वतन्त्रं निर्धारितम् । तत्परिकरतया च सर्वं सिद्धान्तजातं योजितम् । आचार्य्यतया सर्वशास्त्रव्याख्यानेऽपि तत्र च तत्सिद्धान्तानां पूर्वोक्तरीत्या पुष्टिरूपाणां तेषां तेषां प्रदर्शनेऽपि "तत्र तत्राऽञ्जसाऽऽयुष्मन् भवता यद्विनिश्चितम् । पुंसामेकान्ततः श्रेयस्तन्नः शंसितुमर्हसी'' तिवत् "अतः साधोऽत्र यत्सारं समुद्गृह्य मनीषया । ब्रूहि नः श्रद्दधानानां येनाऽऽत्मा सुप्रसीदती'' तिवच्च तेषां तात्पर्य्यन्तु "कृष्णसेवा सदा कार्य्ये'' त्यादिनोक्ते साध्यसाधनभावापन्ने मुख्यभक्तिमार्गे । तदुपयोगिनि ब्रह्मवादे च । "नत्वा हरिं प्रवक्ष्यामि स्वसिद्धान्तविनिश्चयमि'' ति वचनात् । "अतस्तु ब्रह्मवादेन कृष्णे बुद्धिर्विधीयतामि'' ति वचनाच्च । तेन शास्त्रार्थाचयनरूपत्वं श्रीमदाचार्य्यचरणप्रबन्धेषु । स्थूणानिखननन्यायेन दार्ढ्याय वादिबुद्ध्यनुसारित्वेन प्रचारसंसिद्धये च विशेषतो वादमुद्रया तु यथोक्तनिष्पन्नतात्पर्य्यनिर्णायकत्वं श्रीमत्प्रभुचरणीयेषु प्रबन्धेषु ।

निर्णयश्चैष साध्यसाधनभावापन्नमुख्यभक्तिमार्गस्वरूपं भक्तिहंसेन विविच्य भक्तौ च यदसाधारणं कारणमनुग्रहस्तं भक्तिहेतुनिर्णयेन विनिश्चित्य विद्वन्मण्डनेन साकारब्रह्मवादं सिद्धान्तयद्भिश्चार्वैव साध्वेव च सम्पादितः । तत्रापि निरोधटि-

प्पण्या मुख्यभक्तिमार्गं वैशद्येन व्याख्याय तन्निष्कृष्टार्थं शृङ्गाररसमण्डनादिभिर्विज्ञप्त्यादिभिश्च निगमनरूपेणोपवर्ण्य तल्लाभावश्यम्भावाय श्रीमदाचार्य्यचरणपादारविन्दानुध्यान-निष्ठां श्रीमत्सर्वोत्तमस्तोत्रादिभिरुपदिशद्भिः स फलपर्य्यव-सायी कृतः । फलपर्य्यवसितत्वावश्यकत्वायैव च विद्वन्मण्डने प्राधान्येन फलांशोपपादनन्तदुपयोगितया च ब्रह्मवादनिरूप-णम् । तत एव हि तत्र ब्रह्मवादादिना ज्ञानमार्गादिपर्य्यवसान-मसाम्प्रदायिकसंसर्गादिना स्वीयानां माभूदित्याशयेन श्रीम-न्निजाचार्य्यमुख्यतात्पर्य्यरूपः शुद्धपुष्टिसिद्धान्तनिगर्वो "निज-मुरलिकानादाह्वानागते"त्यादिना मङ्गलश्लोकेन पृथक्—स्पष्टं प्रागेवोपदर्शितः । फलैकपर्य्यवसितत्वायैव च पूर्वोक्तरीत्या ब्रह्मवादैकोपपाद्यत्वेऽपि तामुपपत्तिं विद्वन्मण्डनतः पत्रावलम्ब-नादितश्च विभाव्य शुद्धं फलांशमुल्लासयन्तः शृङ्गाररसमण्ड-नादयो विज्ञप्त्यादयश्च ग्रन्थास्तैः पृथक् प्रकटीकृताः ।

तदेवं परिनिष्ठितपाण्डित्योदये उपपाद्यविषयसमुचितप्रती-कोपादानपाटवेन विदुषां ग्रन्थगहननिस्तरणं मर्मज्ञजनमनो-विनोदनं यथा तथैव श्रीमदाचार्य्यचरणप्रणीतग्रन्थानां सकल-शास्त्रापारपारावारविलोडनेन तदर्थसद्रत्नराशिसम्पादनशौ-ण्डानां शास्त्रीयसमुचितप्रतीकालम्बिविवेचनानां सुललितोदात्त-सन्निवेशविशेषाणां भाष्यसुबोधिन्यादीनां परमाश्चर्य्यचर्य्याणां विद्वत्समाजसपर्य्याभिः पर्य्यासितत्वम् । एवमेव च श्रीमत्प्रभु-चरणग्रन्थानां श्रीमदाचार्य्यचरणप्रबन्धनिष्पन्नतात्पर्य्यप्रकाश-नैकपाण्डित्यवरिष्ठानां तद्गूढाशयवशीकारकार्मणप्रक्रियापरि-ष्कारशालिनां चमत्कारकारिप्रतीकौचित्यविचारचातुर्य्यचित्री-कृतविपश्चिदपश्चिमचित्तानां विषयान्तरविस्मारकत्वं सहृदयहृद-याल्हादनत्वञ्च । तदहो नु खलु भोः!!! अतिरुचिररुचिरः सुमधुर-

मधुरो मार्मिकमनोविमोहनश्च श्रीमदाचार्य्यचरणश्रीमत्प्रभुचरणप्रबन्धानां सन्निवेशस्तेन च साङ्गोपाङ्गसम्प्रदायस्वरूपसमर्थने सम्यगेव निष्पन्ने तैः संसाधितः कोऽप्यपूर्वो महामहोत्सवश्च विद्वन्मुकुटमणीनाम् । अत्याश्चर्य्यश्चाऽपि तदीयानां तदास्वादसौभाग्यशेवधिः कोपि ।

भवतु । एवमवान्तरप्रयोजनभेदेऽपि सिद्धान्ततोऽर्थैक्यं तद्ग्रन्थानां स्फुटम् ।

यथा शास्त्रार्थाचयनं श्रीमदाचार्य्यचरणैरनुष्ठितं विभाव्य तत्राऽप्रवृत्त्या तत्प्रबन्धसिद्धार्थदार्ढ्यादिप्रयोजनायैवाऽऽवश्यकत्वाच्छ्रीमत्प्रभुचरणानां प्रवृत्तिः । तथैव ब्रह्मवादादिसिद्धिं विद्वन्मण्डनादितो विभाव्य तदंशे प्रवृत्तिमविधाय यस्मा अयमेतावान् परिकरबन्धः श्रीमदाचार्य्यचरणश्रीमत्प्रभुचरणानां तस्मिन् फलांशे भ्रमाद्यनुदयाय विशेषतस्तमेवोपपादयाञ्चक्रुः श्रीमद्गोकुलाधीशाः । तथापि तदुपकरणतया प्रसक्तानुप्रसक्तन्यायेन साक्षाद्धर्मिपरां मर्य्यादामपि तत्र तत्राऽङ्गीचक्रुरेव । तदुपयोगमपि फलांशे व्यवस्थापयामासुरेव । साधनरूपत्वेऽपि फलरूपत्वं तस्य उपपादयाम्बभूवुरेव । तादृशस्नेहोदयशालिनामपि तदपरित्यागं च समनुमेनिर एव । एतत्तु तैः प्रणीतासु षोडशग्रन्थटीकासु सावहितेन मनसा विलोक्यतां विद्वज्जनैः ।

तथाहि । पुष्टिप्रवाहमर्यादाभेदनिरूपणग्रन्थे " भक्तिमार्गस्य कथनात्पुष्टिरस्तीति निश्चय" इत्येतद्व्याख्यायाम्प्राहुः—"यद्यपि भक्तिमार्गा मर्यादादिभेदेन बहव एव श्रीभागवतादावुक्ताः सन्ति । तथाच कपिलदेवैरुक्तम्——भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यत इत्यादि । तथा चैकादशेऽपि योगेश्वरैर्भक्तभेदकथने भक्तिभेदा उक्ता एव । तथापि शुद्धपुष्टिमार्गाचार्य्यैर्भक्तिमार्गस्य कथनात्पुष्टिरस्तीति निश्चय इति यदुक्तं तस्याऽ-

यमाशयः। तत्र कपिलयोगेश्वराद्युक्तप्रकारेषु शुद्धपुष्टिलक्षणाभावान्न शुद्धपुष्टिभक्तित्वम्।अत एव शुद्धपुष्टिलक्षणमाहुः। 'माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः। स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्नचाऽन्यथा' इति नारदपञ्चरात्रकथनात् । यद्यपि स्नेहो भक्तिरित्येतावदेव मुख्यं भक्तिलक्षणम् । तथापि माहात्म्यज्ञानपूर्वस्त्विति विशेषणकथनस्याऽयमभिप्रायः । प्रथमत एवाऽऽचार्य्यप्रकटितभक्तिमार्गे प्रवृत्तस्य यावत्सुदृढः सर्वतोऽधिकः स्नेहो भवति तावत्सेवादिकरणे अपराधाभावार्थं माहात्म्यज्ञानस्योपयोगः। सुदृढस्नेहोत्पत्त्यनन्तरं तस्य स्वत एव निवृत्तेः। अत एव पूर्णमाहात्म्यज्ञानवतां श्रीदेवकीमातृचरणानामपि शुद्धपुष्टिमार्गस्नेहोत्पत्त्यनन्तरं माहात्म्यज्ञानतिरोभावात् समुद्विजे भवद्धेतोः कंसादहमधीरधीरिति वचनम् । अन्यच्च । तथैव व्रजवासिनां सुदृढस्नेहवतामवस्थासाधनविरुद्धसर्वाशक्यश्रीगोवर्द्धनोद्धरणं तेन च क्षुत्पिपासाद्यसह्यशारीरधर्मनिवृत्तिपूर्वकं सपरिकरसर्वव्रजरक्षाकरणं आत्मयोगानुभावेन श्रीगोवर्धनोपरिस्थितपक्षिपश्वादिरक्षाकरणरूपात्यद्भुतानिर्वचनीयमाहात्म्यं दृष्ट्वाऽपि वृष्टिनिवृत्त्यनन्तरं श्रीगोवर्धनच्छायातः सर्वान् बहिरानीय श्रीगोवर्धनं यथास्थानं सम्यक् स्थापयित्वा बहिरागमनानन्तरं दृष्टमाहात्म्यस्मरणसम्भावनारहितैर्व्रजवासिभिर्व्रजसीमन्तिनीभिश्च भगवति दध्ना तिलकं विधाय तदुपरि अक्षतान् स्थापयित्वा जलं श्रीभगवदुपरि भ्रामयित्वा तज्जलपानेन तदनन्तरमाशीर्योजनेन सुदृढस्नेहवत्त्वात् स्नेहकार्य्यमेव सर्वैर्व्रजवासिभिः कृतं न तु माहात्म्यदर्शनजनितगौरवेण नमनविज्ञप्त्यादिकमपि । तदेवोक्तं तं प्रेमवेगान्निभृता व्रजौकस इत्यादिना। अतो यावत्सुदृढः स्नेहो भवति तावदेव माहात्म्योपयोगः । न तु सुदृढस्नेहोत्पत्त्यनन्तरमपीति सर्वमनवद्यम् । एतदेव

भक्तिमीमांसायां शाण्डिल्यैरपि अथातो भक्तिजिज्ञासेत्युक्त्वा सा पराऽनुरक्तिरीश्वरे इत्येव भक्तिलक्षणमुक्तम्। न तु माहात्म्यज्ञानपूर्वकत्वमपि । अत एव यत्र परानुरक्तिस्तत्र परानुरक्तेरेव सर्वात्मना प्राबल्यम्। न तु माहात्म्यज्ञानसहभावस्याऽपि। अत एव श्रीगोकुले मृत्स्नाभक्षणप्रस्तावे श्रीमुखव्यादानानन्तरं सम्पूर्णब्रह्माण्डदर्शनानन्तरं पूर्णमाहात्म्यज्ञाने जातेऽपि श्रीमातृचरणानां परमानुरक्तिवशात् माहात्म्यज्ञानस्यैव तिरोभावः । न तु पुत्रत्वभावस्याऽपि । तस्मात् माहात्म्यज्ञानाद्युपाधिरहितः साक्षाद्धर्मिस्वरूपपर्य्यवसायी सुदृढः ज्ञानादिसर्वानपनोद्यः सर्वतोऽधिकः अगणितानन्दरूपः अतुल्यातिशयः एतादृशः स्नेह एव भक्तिपदवाच्यः । एतादृग्भक्तिमार्गस्य कथनात् प्रमाणपूर्वकं निरूपणात् पुष्टिमार्गोऽस्तीति निश्चयः। यथा श्रीगोकुले । अत एव श्रीमदाचार्य्यैरुक्तं 'निःसाधनफलात्माऽयं प्रादुर्भूतोऽस्ति गोकुले' इति । अत एव श्रीगोवर्धनोद्धरणप्रस्तावे 'तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहमि' त्यादिना भगवता सप्तदिवसधारणेन लोके जीवानां देवऋषिपित्रात्मात्मीयैहिकपारलौकिकेति सप्त रक्षकाः प्रसिद्धास्तद्रक्षातः पृथक्कृत्य स्वसम्बन्धस्थापनेन स्वयमेव रक्षाकरणेन केवलस्वीयत्वसम्पादनं पुष्टिस्वरूपमिति ज्ञापनायाऽऽचार्य्यैरुक्तं—पुष्टिरस्तीति निश्चय इती" ति ।

विवक्षितभक्तिस्वरूपवैलक्षण्यमवधापयितुं भक्तिभेदान् स्मारयन्ति—यद्यपीत्यादिना भक्तिभेदा उक्ता एवेत्यन्तेन। विवक्षितभक्तेस्तेष्वेवाऽन्तर्भावे शुद्धपुष्टिमार्गाचार्य्यैस्तत्कथनं प्रयोजनाभावादनुपपन्नमित्यन्यथानुपपत्तिबलात्तत्र वैलक्षण्यानुसन्धित्सामुद्बोधयन्ति—तथापि शुद्धेत्यादिना तस्यायमाशय इत्यन्तेन। वैलक्षण्यमेवाऽऽहुः—तत्र कपिलेत्यादिना न शुद्धपुष्टिभक्तित्व-

मित्यन्तेन। शुद्धपुष्टिभक्तिस्वरूपविवरणेन तद्वैलक्षण्यमुपपादयन्ति—अत एवेत्यादिना एतादृशः स्नेह एव भक्तिपदवाच्य इत्यन्तेन। साधनफलदशाभिप्रायेण गौणमुख्यभेदभिन्ना शुद्धपुष्टिभक्तिरुभयी चेह नारदपञ्चरात्रवाक्ये एकतन्त्रेण लक्षितेत्याहुः—यद्यपीत्यादिना माहात्म्यज्ञानस्योपयोग इत्यन्तेन। तथाच गौणभक्तिलक्षणाभिप्रायेणेह माहात्म्यज्ञानपूर्वस्त्विति विशेषणम्। न मुख्याभिप्रायेणेति स्फुटमेतत्। गौणत्वमुख्यत्वे स्फुटयन्ति—सुदृढेत्यादिना स्वत एव निवृत्तेरित्यन्तेन। तेन फलोपकार्य्यङ्गत्वे सति सुदृढस्नेहाख्यफलोपमर्द्यत्वं गौणत्वम्। फलत्वे सति माहात्म्यज्ञानाभिभावकत्वं मुख्यत्वम्। यत्र फलवत्स्वपि श्रीमातृचरणादिषु फलोपकारित्वेन फलानुभवसमये तिरोहितत्वेन च माहात्म्यज्ञानस्याऽविरुद्धा स्थितिस्तत्र साधनदशावत्सु तदुपयोगाभ्यनुज्ञा स्पष्टैवेत्यभिप्रायेण गौणत्वमुख्यत्वयोरित्थम्भावं सोदाहरणमुपपादयन्ति—अत एव पूर्णेत्यादिना न तु पुत्रभावस्याऽपीत्यन्तेन। तथाच माहात्म्यज्ञानस्य स्नेहात्पूर्वत्वं नाम स्नेहोपकार्य्यङ्गत्वे सति सुदृढस्नेहोपमर्द्यत्वम्। एवञ्च साधनफलदशाभेदेन व्यवस्थितोदयविलयं यन्माहात्म्यज्ञानं तत्सहितः स्नेहो भक्तिरिति नारदपञ्चरात्रवाक्यार्थः। तेन साध्यसाधनभावापन्ना द्वय्यपि शुद्धपुष्टिभक्तिरत्र सङ्गृह्य लक्षिता। तत्र माहात्म्यज्ञानसहितः प्रतिबन्धानुदयेन सततमभिवर्धमानोदयो यः स्नेहः "श्रद्धाऽमृतकथायां मे" इत्याद्युक्तरूपाऽविच्छिन्ना मनोगतिः,—स्नेहवदुपदेशसमुज्जीविता भगवदनुग्रहैकलब्धा मार्गरुचिः,—सुदृढस्नेहैकबीजरूपा, सा, साधनभावापन्ना शुद्धपुष्टिभक्तिः। इह हि सुदृढस्नेहसिद्धये सेवादिकरणेऽपराधाभावार्थं माहात्म्यज्ञानस्योपयोग उक्तः। सुदृढः स्नेहो मानसीरूपः "ता नाऽऽविदन्

मय्यनुषङ्गबद्धधिय" इत्याद्युक्तः। तत्सिद्धये च सेवा तनुवित्तजा। सा च स्नेहवदुपदेशानुसारितया तत्स्नेहैकरसा। वेदाविरुद्धतया च मर्य्यादापन्नेति भक्तिहंसे निर्णीतम्। तत्र शास्त्रविरोधेन स्नेहविरोधेन च वर्त्तनमपराधः। तत्र शास्त्रतो द्रव्यशुद्ध्याद्यनङ्गीकारः शास्त्रविरोधः। शास्त्रतो लोकतः स्वतश्च प्रियाप्रिययोग्यायोग्यवस्त्वनिर्धारणेन स्नेहविरोधः। अहमेतावतीं सेवां करोमि इत्याद्युत्सेकश्च शास्त्रतो लोकतश्चोभयस्मादपि विरुद्धः। एवं विरुद्धाचरणेनाऽपराधे फलासम्भवः। फलविलम्बो वा। प्रत्युत पातसम्भवोऽपि। "किमासनं ते गरुडासनाये" त्याद्युक्तरूपे माहात्म्यज्ञाने तु सर्वथैव नोत्सेकसम्भव इति नोभयविधोऽप्यपराधः। प्रत्युत नमनादिना शास्त्रस्नेहाविरोधाचरणसम्पत्तिरपि। "नमस्कृत्य हि वसीयांसमुपचरन्ती" ति श्रुतेः। "अण्वप्युपाहृतं भक्तैः प्रेम्णा भूर्य्येव मे भवेत्। भूर्य्यप्यभक्तोपहृतं न मे तोषाय कल्पते" इति भगवद्वाक्याच्च। ततश्च फलावश्यम्भावः। एवं माहात्म्यज्ञानेनाऽपराधाभावेऽप्रतिहताभिवृद्ध्या सुदृढस्नेहाख्यफलरूपेण नियतं परिणंस्यमानः स्नेहः साधनदशापन्ना गौणी शुद्धपुष्टिभक्तिरिति व्यवस्थापितम्। ततः फलितां मुख्यां फलदशापन्नां तां निगमयन्ति—तस्मादित्यादिना स्नेह एव भक्तिपदवाच्य इत्यन्तेन। माहात्म्यज्ञानाद्युपाधिरहितः साक्षाद्धर्मिस्वरूपपर्य्यवसायीति विशेषणद्वयं धर्मद्वारा धर्मिपराया मर्यादातोऽस्या वैलक्षण्यार्थम्। न गौण्याः सकाशाद्वैलक्षण्यं ज्ञापयितुम्। स्नेहानुपाधित्वे सति सेवाङ्गत्वेन माहात्म्यज्ञानस्य व्यवस्थापनेन तत्सहितायाः शुद्धपुष्टिभक्तेः साक्षाद्धर्मिपरात्वस्य प्रस्फुटत्वात्। एवमतिविलक्षणं साध्यसाधनभावापन्नं स्वमार्गीयं भक्तिपदार्थं निश्चाय्य प्रस्तुतं

व्याचक्षते——एतादृग्भक्तिमार्गस्येत्यादिना पुष्टिरस्तीति निश्चय इतीत्यन्तेन। प्रमाणपूर्वकमित्यादि । तेनाऽप्रामाणिकत्वपाषण्डत्वादिशङ्काव्युदासः। प्रमाणं श्रीभागवतपञ्चरात्रादि। तदिह दर्शितमेव । एवञ्च केवलस्वीयत्वसम्पादनलक्षणः पुष्टिमार्गः प्रमाणोपपन्न इति तत्स्वीकारिभिर्निःसन्देहैर्भवितव्यम्। नत्वप्रामाणिकत्वादिबुद्ध्या तदनङ्गीकारेणाऽऽत्महत्वादिभिरधोधः पातयितव्य आत्मेतीहोपदिष्टम् ।

अत्रैवं धर्मद्वारा धर्मिपराया मर्यादातो वैलक्षण्यज्ञापनेन साक्षाद्धर्मिपरायाः साधनदशापन्नाया गौण्याश्च सकाशात् वैलक्षण्योपपादनेन शुद्धः फलांशो यद्यपि भक्तिमार्ग इत्यादिना पुष्टिरस्तीति निश्चय इतीत्यन्तेन प्रघट्टकेन सर्वोत्कृष्टत्वेन सम्यगेवोपदिष्टः । तेन तत्र तत्र भक्तिपदसाधर्म्येण फलात्मकस्वमार्गत्वभ्रमो मुग्धानां नोदेष्यतीति । स एव हि पुष्टिस्थानां मुख्यो मार्गो नाऽन्य इति । तथाप्याधुनिकानां तादृशाधिकारराहित्येन गौण्यैव शुद्धपुष्टिभक्त्या मुख्यशुद्धपुष्टिभक्तिलाभमभिप्रेत्य स्वमार्गीयायाः साक्षाद्धर्मिपराया मर्यादायाः समादरो व्यवस्थापित एव फलांशे तदुपयोगो बोधित एव साधनरूपत्वेऽपि फलरूपत्वादि च शुद्धपुष्टिभक्तित्वेन तस्याः सूचितमेवेतीह नैदाघमध्यान्हवत्प्रचुरतमप्रकाशपूरपरिपूर्णम् । नांऽशतोऽपि मन्दप्रकाशमित्यभिव्यक्तमेतत्सुधीजनानाम् ।

भक्तिवर्धिनीव्याख्यायाञ्च "अव्यावृत्तो भजेत्कृष्णमि" त्यत्र साधनदशापन्नायाः फलरूपत्वं व्यवास्थापि। तद्यथा—— "अत्र भजने कृष्णपदस्य फलवाचकत्वेनेदं भजनं मम फलरूपमिति ज्ञात्वा भजनं कर्त्तव्यम् । न तु साधनबुद्ध्या । यद्यप्यग्रे लभते सुदृढां भक्तिमित्यनेनाऽलौकिकदेहसम्पत्तिपूर्वकं साक्षात्पुरुषोत्तमभजनस्यैव फलत्वोक्त्याऽऽधुनिक-

भजनस्य साधनत्वमायाति । तथापि पुष्टिमार्गे पुरुषोत्तमस्यैव भजनीयत्वाद्यद्यप्याधुनिकभजनेऽलौकिकदेहसम्पत्तिर्नास्ति तथाप्याधुनिकभजनस्य पुरुषोत्तमपर्य्यवसायित्वमेवेत्यस्याऽपि फलरूपत्वमिति ज्ञापनायोक्तम्——इदं भजनं मम फलरूपमिति ज्ञात्वा भजनं कर्त्तव्यमिति । ननु एकस्यैव साधनरूपत्वं फलरूपत्वञ्च कथं सम्भवतीति चेत् । सत्यम् । साक्षात्पुष्टिमार्गीयफलस्येतरसाधनासाध्यत्वात्पुरुषोत्तमभजनमेव साक्षात्पुष्टिमार्गीयफलसाधकम् । यथा महाराजस्य धार्य्यमपि सुवर्णरत्नादिकमेव । व्यवहार्य्यमात्राण्यपि तन्मयान्येव । अथ च कोशे सङ्ग्राह्यमपि सुवर्णरत्नादिकमेव । यतस्तस्य महाराजस्य सर्वतोऽधिकत्वात् । सुवर्णस्यापि सर्वधात्वपेक्षयोत्कृष्टत्वात्तथा । तद्वदस्य फलस्य सर्वोत्कृष्टत्वभावात्सर्वोत्कृष्टमेव साधनमपेक्षितम् । सर्वोत्कृष्टस्य साधनस्य विचारे क्रियमाणे भजनातिरिक्तस्य सर्वोत्कृष्टत्वाभावात्सर्वोत्कृष्टमेव साधनं सर्वोत्कृष्टफलमेवेति भजनमेव साधनं भजनमेव फलमिति नाऽनुपपत्तिः काचित्" इति ।

सुदृढस्नेहवतामपि साधनदशापन्नायाः शुद्धपुष्टिभक्तेरपरित्यागमाहुः पुष्टिप्रवाहमर्यादाभेदनिरूपणग्रन्थे "लौकिकत्वं वैदिकत्वं कापट्यात्तेषु नाऽन्यथा । वैष्णवत्वं हि सहजं ततोऽन्यत्र विपर्य्ययः" इत्येतत्कारिकाव्याख्याने ।

तथाहि । "ननु यदि तेषां केवलं भगवत्परत्वमेव तर्हि श्रौतस्मार्त्तकर्माचरणे को हेतुरिति चेत् । तत्राऽऽहुः——लौकिकत्वं वैदिकत्वमिति । यद्यपि ज्ञानमार्गीयस्याऽपि भक्तस्य तावत्कर्माणि कुर्वीतेत्यनेन श्रौतस्मार्त्तकर्माचरणस्याऽनावश्यकत्वं श्रूयते । पुष्टिमार्गीयाणामपि यानास्थायेति वाक्यात् । अत्र आस्थायेत्यास्थानं नाम कायवाङ्मनसां तदेकपरत्वम् ।

तादृशानामपि श्रौतस्मार्त्तकर्माचरणानावश्यकत्वेऽपि यत्कर्माचरणं तत्र को हेतुरित्याशङ्क्य हेतुमाहुः––वैदिकत्वं लौकिकत्वं कापट्यादिति । वैदिकत्वं वैदिककर्माचरणम् । लौकिकत्वं लौकिकव्यवहारादिप्रतिपालनम् । तत्तेषु कापट्यात् । कापट्याद्धेतोरित्यर्थः । कापट्यं नाम लोकसङ्ग्रहः । अत एव भगवताऽप्युक्तम्––सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत । कुर्य्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसङ्ग्रहम् । न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् । जोषयेत्सर्वकर्माणि विद्वान् युक्तः समाचरन्निति । भगवद्वाक्यात्तत्तन्मार्गीयपूर्णभक्तिमतां लौकिकवैदिककर्माचरणं लोकसङ्ग्रहार्थमेव । न तु कर्मासक्तानामिव परमपुरुषार्थरूपत्वेन । यद्यपि तेषां पूर्वोक्तकर्मकरणमनासक्तिपूर्वकं लोकसङ्ग्रहार्थमेवेत्युक्तम् । तर्हि तेषां कस्मिन् कर्मणि आसक्तिपूर्वकं करणमिति चेत् । तत्राऽऽहुः––वैष्णवत्वं हि सहजमिति । वैष्णवत्वं नाम पुष्टिमर्यादाप्रवर्त्तकाचार्य्योपदेशपूर्वकं तदुक्तप्रकारेण तन्मार्गानुवर्त्तित्वम् । तदेव तेषां सहजो धर्मः । स्वाभाविको धर्मः––सहजमिति । तेन तन्मार्गीयाणामेव धर्माणामासक्तिपूर्वकं करणम् । ततोऽन्यत्र ततः वैष्णवधर्मातिरिक्तधर्मेषु विपर्य्ययः पूर्वोक्तप्रकारः—अनासक्तिपूर्वकं करणम् । लोकसङ्ग्रहार्थं करणमित्यर्थ" इति ।

ननु कायवाङ्मनोभिर्भगवद्धर्मपराणां लोकसङ्ग्रहार्थमपि लौकिकवैदिककर्माचरणे प्रवृत्तिर्दुर्वचा । भगवद्धर्मविरोधित्वादित्याशङ्क्य तत्समाधानमाहुः—भगवद्वाक्यादित्यादि । तथाच भगवद्वाक्यबलेन लोकसङ्ग्रहाय तेषां लौकिकवैदिककर्माचरणम् । न विधिवाक्यबलेन । येन तद्विरोधः सम्भवेत् । आज्ञानुपालनस्य सेवकधर्मतया भगवद्वाक्यप्राप्तं तु भगवद्धर्मरूपमेवेति भावः ।

एवञ्च यत्र स्वमार्गीयपूर्णभक्तिमतामपि लोकसङ्ग्रहार्थं लौकिकवैदिककर्माचरणमावश्यकम् । भगवदाज्ञप्तत्वेन तथा तदनुष्ठानस्य सेवकधर्मत्वात् । तत्र तादृशभक्त्युदयमिच्छतां दासत्वेन तथा तदनुष्ठानस्याऽऽवश्यकत्वे किं वाच्यम् । "देशान् पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान् । देवासुरमनुष्येषु मद्भक्ताचरितानि चे"ति भगवतो वाक्येन तादृशदासाचरणाश्रयणस्याऽऽवश्यकत्वात् । फलदशापन्नभक्तिशालिनां स्वतन्त्रपुरुषार्थत्वेन लोकसङ्ग्रहरूपसेवकधर्मानुष्ठानम् । फलोदयमभीप्सतां तु परतः पुरुषार्थतया स्वमार्गीयसाधनत्वेनेति विशेष इत्यन्यदेतत् ।

एतेन येषां लोकसङ्ग्रहापेक्षा तैः कापट्याच्छ्रौतस्मार्त्तकर्माण्यनुष्ठीयन्ताम् । येषाञ्च तदनपेक्षा तैस्तु कामं तानि परित्यज्यन्तामिति ग्रन्थानारूढमेव किञ्चिदुत्प्रेक्षमाणाः प्रत्युक्ता वेदितव्याः । सेवकधर्मत्वेनैव तदनुष्ठानावश्यकतोपपादनात् ।

ननु भक्तिवर्धिनीव्याख्यायां "यथा भक्तिः प्रवृद्धा स्यात्तथोपायो निरूप्यते । बीजभावे दृढे तु स्यात्त्यागाच्छ्रवणकीर्त्तनादि" त्यत्र त्यागात्पदव्याख्यायां "एतन्मार्गीयातिरिक्तसाधनत्यागादि" त्याहुः श्रीगोकुलाधीशाः । तथैव "बीजदार्ढ्यप्रकारस्तु गृहे स्थित्वा स्वधर्मत" इत्यत्र स्वधर्मतःपदव्याख्यानेऽप्याहुः—"अत्र स्वधर्मपदेन वर्णाश्रमधर्मा न विवक्षिताः । किन्तु स्वमार्गीयभगवद्धर्मा विवक्षिता" इत्यादि । तेन पुष्टिभक्तिमभीप्सुभिर्वर्णाश्रमाचारास्त्यक्तव्या इति चेत् । सत्यम् । त्यक्तव्याः । परमेतन्मार्गीयातिरिक्तसाधनत्वेनैव । न तु स्वमार्गीयसाधनत्वेऽपि । अस्ति च तेषां स्वमार्गीयसाधनत्वमपि । तच्च वर्णाश्रमधर्मत्वेन तदनुष्ठाने प्रयोजनाभावे सति लोकसङ्ग्रहार्थं भगवदाज्ञप्तत्वेनाऽनुष्ठाने समुद्भवतीति प्रागुक्तात्स्फुटम् ।

"श्रद्धाऽमृतकथायां मे" इत्यादिस्वमार्गीयसाधननिरूपणसन्दर्भे "इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तप" इति श्रौतस्मार्त्तानां भगवदर्थं कृतानां स्वमार्गीयसाधनत्वोक्त्याऽप्येतत्स्फुटम् । "कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन् । मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरातिरि" त्युक्त्या "मदर्थे धर्मकामार्थानाचरन् मदपाश्रयः । लभते निश्चलां भक्तिं मय्युद्धव सनातने" इत्युक्त्या "भगवदीयत्वेनैव परिसमाप्तसर्वार्था" इत्युक्त्याऽपि चैतत्तथा । किञ्च । अतिरिक्तस्य त्यागस्तदुपयोगिनश्च स्वीकारः फलमात्रोत्पत्तौ तन्त्रम् । तत एव श्रीमत्सुबोधिन्यास्तामससाधने प्रकरणार्थोक्तौ "विद्यापञ्चकमत्रापी" त्येतत्कारिकाटिप्पण्यां विद्यापञ्चकव्युत्पादने तृतीयां व्युत्पादयद्भिः श्रीमत्प्रभुचरणैः—"इतरभजनं न कार्य्यम् । पारम्पर्य्यागतमपि धर्मं भगवदिच्छायां सत्यां विसृजेतेति तृतीये" ति पारम्पर्य्यागतधर्मत्यागः पुष्टिमार्गीयविद्योदयत्वेन निरूपितः । तस्मादतिरिक्तसाधनत्याग एव श्रीमद्गोकुलाधीशैस्त्यागपदार्थो व्याचक्रे । न त्वेतावता भक्तौ सदाचारोच्छेदोऽपि तैरभिप्रेतो येन भक्तिमार्गीयत्वेनाऽपि बोधितानां लौकिकवैदिकानां त्याग आपाद्येत । स्वानभिमतमन्दार्थप्रयोजनकतया मार्गान्तरीयसाधनव्युदासः स्वाभिमतमहाफलप्रयोजनकानां स्वमार्गीयाणां मार्गान्तरीयतदपेक्षया "क्रयाविक्रयवेलायां काचः काचो मणिर्मणिरि" ति न्यायेन परीक्षापक्षपातिनां प्रेक्षावतां परिषत्सु परमोत्कृष्टतया सकलसाधनमूर्धाभिषिक्तानां साधनानां समादरः तत्रापि स्वप्नेऽपि सदाचारोच्छेदसम्भावनासम्बन्धराहित्यमिति तु "अधिकं तत्राऽनुप्रविष्टं न तु तद्धानिरि" ति न्यायेनाऽतितरामेव तावदुचितज्ञचेतश्चमत्कारीति कियदधिकमुच्यताम् । मार्गान्तरीयाच्छ्रौतस्मार्त्ताचरणात्स्वमार्गीयस्य तस्यैवं

वैलक्षण्येऽपि तद्वैलक्षण्यं विद्वद्वबोध्यमेव। अन्यस्याऽग्रे तूक्तं कासरसमीपे सरसवल्लकीवादनसगन्धमेव तत्सम्पद्यते। अनवबोधे च तस्याऽन्यथा ग्रहणमप्यवश्यम्भावाद्दुरपनोदम्। ततश्च तत्त्यागाद्यापत्त्या सदाचारोच्छेदादिप्रसक्त्या महानेवाऽनर्थोदयः स्यात्। स मास्त्वित्येतदर्थं "न बुद्धिभेदं जनयेदि"ति वाक्यात्तेषां पुरतस्त्वेतन्निरूपणमपि न कर्त्तव्यम्। किन्तु कर्मासक्तैर्यथा लौकिकवैदिकाभिमानेन तान्यनुष्ठीयन्ते तथैव लोकसङ्ग्रहाय स्वयं भगवदेकतत्परैरनुष्ठेयानीति "लौकिकत्वं वैदिकत्वमि" त्येतट्टीकायां श्रीगोकुलाधीशैर्व्यवस्थापितम्। तेन मार्गान्तरीयतत्त्यागोऽप्यान्तर एव पुष्टिस्थसम्मत इति स्वमार्गीयतदाचरणप्रतिषेधस्त्वनवसरग्रस्त एवेत्युपरम्यते। एतेन स्वधर्मत इत्येतद्व्याख्यातं वेदितव्यम्।

ननु यानि वचनानि "श्रद्धाऽमृतकथायामि" त्यादीनि स्वमार्गीयमर्यादाबोधकानि प्रागुपन्यस्तानि। तान्यपीह भक्तिवर्धिनीव्याख्यायां प्रागुपन्यस्य तदुक्तसाधनानां मर्यादात्वमुक्त्वा च तत्त्यागस्त्यागपदार्थः श्रीगोकुलाधीशैर्व्याख्यात इति साक्षाद्धर्मिपराया अपि मर्यादायाः शुद्धपुष्टिमार्गेऽनुपयोग इति चेत्। अहह गहनो मोहमहिमा। वस्तुस्थितिविचारे हि साक्षाद्धर्मिपरायाः शुद्धपुष्टितत्फलप्रापकत्वव्यवस्थापनाद्विरोधाभावेन त्यागे कारणं न पश्यामः। तत एव श्रीगोकुलाधीशा यथोक्तमुक्त्वोपसंहारे त्यागात्पदव्याख्याने "एतन्मार्गीयातिरिक्तसाधनत्यागादि" त्यूचुः। तेनैतन्मार्गीयातिरिक्तसाधनबोधकत्वाभिप्रायेणैव तेषां वचनानामुल्लेखस्तदुक्तसाधनत्यागोपदेशश्चेति स्पष्टमेवाऽवगम्यते। साध्यसाधनदशापन्नत्वञ्च शुद्धपुष्टेः स्फुटं तदभिमतम्। भक्तिवर्धिनीव्याख्यानमेव हि प्रधानं तद्गमकम्। "एतन्मार्गीयातिरिक्तसाधनत्यागादि" त्युक्त्या पूर्वोक्तमाहात्म्य-

ज्ञानोपयोगव्यवस्थानेन च तदेतदभिव्यक्तम् । सिद्धान्त-मुक्तावलीविवृतिटिप्पण्याञ्च मानस्या मानसीत्वं किंरूपमित्या-कांक्षायाम्—"सर्वात्मभावस्य मनोधर्मत्वात्तत्पूर्विकायास्तस्या मानसीत्वमुक्तमिति न काचित्क्षतिरि" ति फलरूपत्वं तस्याः प्रदर्श्य तत्प्राप्तये तनुजवित्तजे कार्य्ये इत्याशयेनाऽऽहुः श्रीगो-कुलाधीशाः—"नन्वेवमाधुनिकैस्तादृशाधिकाररहितैस्तन्मार्गप्रव र्त्तकाचार्य्योक्तप्रकारेण क्रियमाणसेवाया अनुपयोगमाशङ्क्या-ऽऽहुः—उक्तसेवासाधने इति । तेषां तादृशाधिकाराभावेऽपि तदुक्तप्रकारेण क्रियमाणत्वात्पूर्वोक्तमेव फलं सम्भवतीत्यर्थः। यथा चैतत्तथा भक्तिहंसे विस्तृतं पितृचरणैरिति नात्र वि-स्तरः ।" इति । ततश्च साध्यसाधनदशापन्ना द्विविधा शुद्ध-पुष्टिस्तन्मते स्फुटा । तत्र साधनदशापन्नेषु साधनानामावश्य-कतया नियतफलानुकूलतया च तत्त्यागवचनमसङ्गतमेव । तेन मार्गान्तरीयसाधनबोधकत्वाभिप्रायेणैव "श्रद्धाऽमृतकथाया" मिति सन्दर्भस्य प्रतिषेध्यपक्षे निक्षेपः । स्वमार्गीयसाधनबोध-कत्वाभिप्रायेणाऽपि निषेधे तु प्रयोजनं नास्त्येव किमपि । ननु "श्रद्धाऽमृतकथायामि" त्यत्रोक्तानां साधनानां स्वमार्गीयत्व एव किम्प्रमाणमिति चेत् । साक्षाद्धर्मिपरत्वस्यैव स्वमार्गीयत्वे तन्त्रत्वात्तदेवेत्यवधेहि । किञ्च । श्रीमद्गोकुलाधीशास्तनुजवि-त्तजयोः श्रीमदाचार्य्यचरणोक्तप्रकारेण तत्करणे मानसीसाधक-त्वमभिधाय श्रीमदाचार्य्यचरणोक्तस्तत्प्रकारः किंविध इत्याकां-क्षायां भक्तिहंसोक्तः स इत्याहुः—"यथा चैतत्तथा भक्तिहंसे विस्तृतं पितृचरणैरिति नाऽत्र विस्तर" इति । भक्तिहंसे तु स्नेहतन्मयः स्नेहाचारैकरसस्तत्रापि वेदाविरोधेन व्यवस्थितो मर्य्यादापन्नः स प्रकार इति निर्णीतम् । तादृशप्रकारविशिष्टा तनुवित्तजैव च स्वमार्गीया शुद्धपुष्टिरूपा शुद्धपुष्टिफलिका च

मर्यादाभक्तिः । सा च “श्रद्धाऽमृतकथायामि”ति सन्दर्भेणैव कृतनिरूपणेत्यपि भक्तिहंसे स्थितम् । तेन तत्सन्दर्भोक्तानां साधनानां स्वमार्गीयत्वं श्रीमद्गोकुलाधीशानामभिमतमेवेति साक्षात्तद्वचनसुधयैव समुज्जीवितम् । एवं सति मार्गान्तरीय-साधनबोधकत्वमेव परमतप्रसिद्धमनूद्य तदुक्तसाधनत्यागस्त्याग-पदार्थः श्रीगोकुलाधीशैर्विवृतः । न स्वमार्गीयसाधनबोध-कत्वमभिप्रेत्याऽपि । तस्य स्वमतासिद्धतया त्यागायोगात् । पर-प्रसिद्धं हि विरोधित्वात्प्रतिषेध्यं न स्वमतसिद्धमविरोधित्वा-दिति । श्रीमदाचार्य्यचरणाविर्भावात्प्राङ् मार्गान्तरीयसाधन-बोधकत्वमेव वचनेष्वेतेषु लोकैर्गृहीतं स्थितम् । पुष्टिमार्गस्यैव तदानीमनाविर्भूततया तन्मार्गीयसाधनबोधकत्वस्फूर्त्तिस्तत्राऽ-सम्भाव्यैवेति । तत एव धर्मद्वारा धर्मिपराणां साक्षाद्धर्मिपरे-ष्वपि व्रजस्थेषु स्वाधिकारानुरूपबोधनियमेन धर्मद्वारैव धर्मिप-रत्वबोधः प्राङ्निदर्शितो “ललितगतिविलासे” त्यादि श्लोकोप-न्यासेन । तस्मान्मार्गान्तरीयसाधनबोधकत्वाभिप्रायेणैव तदु-पन्यासादिकं भक्तिवर्धिनीव्याख्यायामिति निस्संशयमेतत् ।

एतावता श्रीमदाचार्य्यचरणश्रीमत्प्रभुचरणसिद्धान्तेन श्री-गोकुलाधीशानां सिद्धान्तस्य नीरन्ध्रमैक्यं स्फुटतरमत्रोपदिष्ट-मिति स्पष्टम् ।

तस्मात्तथा तथा पूर्वपक्षप्रतिपादितस्वरूपं पुष्टिपाषण्डमत-मिदानीमन्यदेव लब्धप्रचारम् । तथैव च श्रीमदाचार्य्यचरणश्रीमत्प्र-भुचरणश्रीगोकुलाधीशेषु वृक्षपुष्पफलन्यायेन सुचारुचामीकरत-च्चित्रालङ्कारतत्रत्यसद्रत्नयोगन्यायेन देहहृदयतद्गततात्पर्य्यन्यायेन चोत्तरोत्तरमुत्कर्षनिरूपणं तत्र च तदैक्यप्रदर्शनप्रलोभेन जना-नात्मपक्षे सङ्गृह्य तन्मततत्प्रवर्त्तकस्वरूपतारतम्यदुर्गीतं यत्त-दपि पुष्टिपाषण्डजालमेव तदुपोद्बलकमित्यतिरोहितमेतत् ।

वस्तुतत्त्वविदः साम्प्रदायिकास्तु तुल्यभावेनैव तान् भजन्ते । तुल्यभावेनैव च तदुक्तीः शिरसा सम्मानयन्तीति नैतदवधानपथात्प्रच्यावयितव्यम् ।

एवं तत्प्राबल्ये स्थिते स्वानुभावप्रकटनहृदयस्य श्रीमद्वृन्दावनेन्दोराज्ञया भुवि प्रादुर्भूतैरतिकरुणैस्तत्प्रकटितरासिकानन्दसन्दोहरूपस्फूर्जद्रासादिलीलामृतजलधिभराक्रान्तसर्वैः श्रीमदाचार्य्यचरणैः प्रकटितं यथोक्तस्वरूपं साक्षान्मुख्यपुष्टिमतमेतर्ह्यन्तर्धीयत इव निह्नूयत इव सर्वथैव च प्रमुष्यत इवेति किं वाच्यम् ।

हन्ताऽहो श्रीमदाचार्य्यचरणवचनामृतैकजीविताः साम्प्रदायिका विद्वांसो धारयत धारयत सम्प्रदायप्रमोषेण रत्ननिचितकलधौतसौधशिखरात् काकगर्त्तेष्वधोमुखं निपतन्तमात्मानुगतं जनम् । प्रणिधत्त च विपदोऽस्या अञ्जसैव निस्तरणाय श्रीमदाचार्य्यचरणपादारविन्दावधानसुधाम् । संस्मरत संस्मरत न कदाचित्प्रमादतोऽपि विस्मरत "विद्वद्भिः सर्वथा श्राव्यं ते हि सन्मार्गरक्षका" इति सकलपाषण्डतुण्डनिर्मोटिनीं श्रीमदाचार्य्यचरणाज्ञाम् । संरक्षत संरक्षत च सन्मार्गमित्यभिप्रार्थयामहे ।

एवमत्युद्धतरीत्या प्रवर्द्धमानसम्बाधं पुष्टिपाषण्डप्राबल्यमभिसमीक्ष्यैव तत्प्रतीकारविचारे तन्निर्हननमभीप्सुभिः स्वसिद्धान्तमुख्यग्रन्थप्रकाशनाध्यापनाध्ययनव्याख्यानानुव्याख्यानाद्येव महता वेगेन प्रवर्त्तनीयं नाऽन्यदिति विनिश्चित्यैव च चतुर्थपञ्चमपीठाधीश्वरैर्भुवनाभिष्टुतानुभाववैभवानां श्रीदेवकीनन्दनाचार्य्याणां सूनुभिः श्रीवल्लभाचार्य्यगोस्वामिवर्य्यैरादौ वादमुद्रया श्रीमदाचार्य्यचरणसमभिमतयथोक्तप्रकारकसाकारब्रह्मवादमहासिद्धान्तसंस्थापको विद्वन्मण्डनाख्योऽयमनर्घसिद्धान्तरत्नप्रवेकजालमालाविशालाशयः प्रबन्धो नानाविधानेकव्याख्याटिप्पणपरिष्कारतत्परिकरीभूतप्रस्तावनानिष्कर्षोत्कृष्यमाण-

प्रकाशनकृत्यः पण्डितमण्डलीमूर्धन्यमूर्धनिर्धूननदेशिकः सम्प्रति प्रकाश्यते ।

तदध्ययनाध्यापनादिना अभिप्रवर्द्धतामभिप्रवर्द्धतां सकललोकश्रेयस्करः समस्तवाङ्मयसमन्वयसामर्थ्यसर्वसन्मतसमभ्यर्हितनिरस्तसाम्यातिशयसमुच्छ्रयविशेषः श्रीमदाचार्य्यचरणैकदर्शितः साकारब्रह्मवादापरपर्य्यायः पुष्टिसम्प्रदायो नाम सन्मार्ग इत्याशास्महे ।

श्रीमदाचार्य्यचरणैः श्रीमत्प्रभुचरणैः श्रीगोकुलाधीशैश्च प्रदर्शितया रीत्या तत्सिद्धान्तसरणिस्वरूपसंरक्षणाय विद्वन्मण्डनोपोद्घातोऽयं विलिखित इतीमं साद्यन्तमनुशील्य भ्रान्ताःस्वभ्रममुत्सादयन्तु । अनभिरुचिदूषिताः स्वचित्तकल्मषमुन्मार्जयन्तु । विद्वांसश्च निर्मत्सराः श्रीमदाचार्य्यचरणचरणारविन्दानुध्यानैकनिरस्तपाषण्डस्पर्शसम्भवास्तदाज्ञयैव सर्वथा संसिद्धाधिकाराः सन्मार्गं संरक्ष्यासुरित्याशास्महे ।

श्रुतिस्मृतिप्रभृतियथार्थनिर्वृतिस्तपातपप्रशमशशाङ्कशोचिषः ।
जयन्ति ताः सहृदयहृद्रसायनं महाप्रभोर्भणितिसुधा बुधादृताः ॥ १ ॥
श्रीमत्कृष्णास्यैराचार्य्यैर्बोधितनिजसिद्धान्तविवेकः ।
तत्प्रेरणया तज्जनतुष्ट्यै तमनूदितवान् तज्जनदासः ॥ २ ॥
गोत्रे काश्यपसे समस्तनिगमन्यायाब्धिमन्थाचला
आन्ध्रा दक्षिणदिक्पथेऽध्वरिवराः श्रीरामचन्द्रा इति ।
तत्पुत्राः पितृतुल्यकीर्त्तिकृतयो वादीभपञ्चाननाः
श्रीकृष्णाङ्घ्रिरजःपरा हरिहराख्या दीक्षिता जज्ञिरे ॥ ३ ॥
श्रीवल्लभाधीशकृपाबलाढ्याः श्रीविट्ठलाधीशगृहीतहस्ताः ।
गोवर्द्धनाधीश्वरपादपद्मपरागरागैकरसान्तरङ्गाः ॥ ४ ॥
बुद्ध्या स्वरूपेण गुणैः प्रभावाद्गणाधिपस्यैव परावताराः ।
तत्सूनवो दीक्षितधुर्य्यचर्य्याः प्रादुर्भवन्ति स्म गणेशभट्टाः ॥ ५ ॥
समस्तसाद्गुण्यनिजानुभावस्वरूपबोधस्वमतज्ञताभिः ।
स्वसम्मतानप्रतिमानवेक्ष्य यान् वेदवेदान्तविदां वरिष्ठान् ॥ ६ ॥

श्रीमन्निजाचार्य्यपथानुरक्तांस्तत्पुत्रवर्य्यैः प्रभुविट्ठलेशैः।
श्रीशोभया स्वात्मजयाऽग्र्यया ये स्वं देहसम्बन्धमपि प्रणीताः॥७॥
गोवर्द्धनाधीश्वरमुख्यसेवाप्रदानसौभाग्यसमर्हणाभिः।
समाहृताः, श्रीस्मरमोहनेन स्वाचार्य्यसेव्येन कृतार्थवंश्याः॥ ८॥
अनुष्ठितान्येव मुदा महान्ति यै राजकार्य्याण्यपि तानि तानि।
श्रीविट्ठलेशाङ्घ्रिसमर्हणार्थं पार्श्वे स्थितैर्वीरवरस्य राज्ञः॥ ९॥
तदन्वये महति महद्भिरर्हिते महद्गुणैरनुचरिते श्रिते हरिम्।
निजाध्वनि व्यवसितसर्वचेष्टितं समृद्ध्यते प्रभुचरणानुकम्पितम् १०

प्रभूतगुणपूर्णेषु येन भट्टकुलेष्वपि।
प्राधान्यधन्यतामाप त्रिगृहाख्यमिदं कुलम्॥ ११॥
अनुकम्पामपेक्ष्यैव प्राभवीं काप्यकम्पिताम्।
अद्यापि यत्र गोविन्दः स्वकृपामभिवर्षति॥ १२॥
श्रीमद्गणेशभट्टानां पुत्ररत्नेषु सप्तमः।
श्रीमान् हरिपतिर्जज्ञे पित्रोरनुगुणो गुणैः॥ १३॥
तस्याऽष्टमः कुले तावत् सर्वतो विश्रुतश्रवाः।
नानाविद्यासु निष्णातो राजभिर्मान्यशासनः॥ १४॥
वैद्यविद्यास्वद्वितीयः श्रीमद्भागवताश्रयी।
प्रभुसेवासु हेवाकी गोकुलाभिजनो महान्॥ १५॥
श्रीनाथद्वारवास्तव्यो गोवर्द्धनधरानुगः।
नित्यं निरीक्षितश्रीमद्गोवर्द्धनधराननः॥ १६॥

---

१ सम्प्रति तावत् श्रीहरिपतिभट्टानां पुत्रद्वयमध्ये ज्येष्ठानां वंशे नातिपूर्वं तिरोहिते कनिष्ठानां वंश्येष्वसमतिपितृपितामहादिषु स्थितेष्वपि अनावेद्यैव–अनाख्यायैव–अप्रबोध्यैव स्वसामर्थ्यातिशयात्प्रसभमेव निजक्रोडीकृततया कोटानगरे श्रीमन्मथुराधीशगृहतिलकायितैः श्रीरणच्छोडलालजीमहाराजगोस्वामिभिः स्वतिरोभावसमये स्वकन्यकायै अ. सौ. श्रीशोभाबेटीनाम्न्यै आत्रेयिश्रीमोहनलालाजीमहाशयपत्न्यै यावज्जीवेत्तावद्देव प्रदानात् परस्वापहारमुद्रया तन्मूर्ध्नि विराजमानेन श्रीस्वामिनीसहितेन श्रीमद्गोवर्धनधरस्वरूपप्रतिनिधितया वार्त्तादिष्वभिष्टुतेन श्रीमदनमोहनाख्येन भगवत्स्वरूपविशेषेण परमकृपया श्रीमत्प्रभुचरणैः श्रीगणेशभट्टेभ्यः प्रदत्तेन। २ कृतार्थवंश्याः। कृता इति शेषः।

इदानीं यमुनाकूले मथुरामावसन् पुरीम् ।
श्रीनाथसेवारसिकः श्रीमान् देवकिनन्दनः ॥ १७ ॥
तिलकायितवर्य्याणां जगद्भूषणवर्चसाम् ।
श्रीमद्गोवर्द्धनार्य्याणां कृपाभिरभिवर्षितः ॥ १८ ॥
श्रीमद्गोकुलनाथानां सर्वसाद्गुण्यशालिनाम् ।
यशोविभूषितदिशां करुणातरुणादरः ॥ १९ ॥
श्रीमद्भिर्वल्लभाचार्य्यैर्देवकीनन्दनात्मजैः ।
दत्ताज्ञः श्रीमदाचार्य्यवंशोदधिसुधाकरैः ॥ २० ॥
वल्लभाधीशवंश्येषु यथास्थिति नतान्तरः ।
तत्सुतो बलभद्राख्य उपोद्धातमिमं व्यधात् ॥ २१ ॥
अभ्यस्ताय महेन्द्रनलिपटलैर्ध्यांताय धाराधरै-
रुन्निद्रैः पठिताय नीलनलिनैर्ज्ञाताय सान्द्राञ्जनैः ।
नन्दप्राङ्गणसम्भृताय बलवत्सक्ताय गोपीजने
सूतां श्यामलिमोच्छ्रयाय परमां प्रीतिं प्रणामाञ्जलिः ॥२२॥
वर्द्धन्तामभिवृद्धयो भगवतो गोवर्द्धनाधीशितुः
सेवोल्लासविलासरासरसिकैरास्वाद्यमाना भृशम् ।
श्रीमद्वल्लभविठ्ठलेशभगवत्पादैः कृताभ्यागमाः
स्वीयानां निजमन्दिरेषु सततं क्रीडन्तु कृष्णर्द्धयः ॥ २३ ॥
श्रीमदाचार्य्यचरणाः शरणागतवत्सलाः ।
अङ्गीकुर्वन्तु कृपया कृतिमेतां समर्पिताम् ॥ २४ ॥

इति श्रीमदाचार्य्यचरणश्रीमत्प्रभुचरणश्रीगोकुलाधीशपादारविन्दरेणुकणलाभ-समधिगतसर्वसौभाग्यशेवधिना त्रिगृहोपाह्वश्रीहेवजीलालाजीत्युपाख्य-श्रीदेवकीनन्दनतनुजनुषा भट्टश्रीबलभद्रशर्म्मकविकाव्यरत्नाकरकविचूडामणि-शुद्धाद्वैतभूषणकविरत्नमहामहोपदेशकविद्यालङ्कारवेदान्तविद्यानिधिना विनिर्मितो विद्वज्जनावर्जनं नाम विद्वन्मण्डनोपोद्धातः सन्मार्गसंरक्षणापरपर्य्यायः

सम्पूर्णः ।

श्रीकृष्णार्पणमस्तु ।

विद्वन्मण्डनप्राप्तिस्थानम् ।

श्रीगोकुलचन्द्रमाजीमन्दिर, विद्याविभाग, कामा,

जि. भरतपुर ।

पुस्तकान्तराणि ।

सिद्धान्तसिद्धापगा ।	।=)
व्याख्यानरत्नावलिः ।	=)
आयुर्वेदसमुन्नतिः ।	=)
शतरंजसरोज ।	१)

प्रायः सर्वेषां साम्प्रदायिकानां प्रबन्धानां प्राप्तिस्थानम्—

(१) श्रीमद्बालकृष्णपुस्तकालय,
बड़ा मंदिर, मुम्बई.

(२) श्रीमद्वल्लभाधीशविद्यामन्दिर,
विश्रामघाट, मथुरा. यू. पी.